नं० ४२६२ — घ

शास्त्रदीपिका प्रकाश तृतीयाध्यायः

पत्राणि ६८ (पूर्ण)

नं० ४२६२-घ

पूास्त्रदीपिकाप्रकाशान्तृतीयाध्यायः

नं० ४२६२-घ

पत्राणि ६-६ (पूर्ण)

६५ अथातः शेषलक्षणं हेतुहेतुमद्भावसंगतिं सूचयन् हन्तं वदन्नवशिष्यमाणं प्रतिजानीत एवमिति। इदानीमि
त्यनेन प्रयुक्तादेः शेषशेषिभावापन्नत्वेनाऽनवसरत्वं सूचितं। शेषशेषित्वस्याध्यायार्थत्वेपि सूत्रे एकत्वा
नेनान्तरीयकत्वेनाऽसिद्धेः सूत्रापि शेषित्वस्य शेषघटितत्वाच्छेषस्य लक्षणमिति बोध्यं। ननु पूर्वाध्यायार्थक
र्मभेदं विनापि शेषशेषित्वदर्शनान्न भेदशेषलक्षणयोर्हेतुहेतुमत्त्वमिति शंकते यद्यपीति। शेषशेषित्वेति। व्री
हीणां शेषिता स्रवघातस्य शेषता। सा मस्य शेषता यागस्य शेषितेत्यर्थः। न ह्यत्र कर्मणोरेव शेषशेषित्वमिहाभि
रूप्यं किंतु कस्यचिच्छेषशेषित्वं तत्र च कर्मणां शेषशेषित्वनिरूपणं कर्मभेदनिरूपणं विना न शक्यमित्यस्ति हेतु
मत्त्वमिति परिहरति तथापीति। द्रव्यकर्मणोः शेषित्वनिरूपणेपि भेदलक्षणस्य हेतुत्वसंभवात्किमित्येकदे
शमुखेन हेतुत्वसमर्थनमिति प्राभाकरशंकते नन्विति। शास्त्रान्तर एवेति। शास्त्रान्तरप्रतिपाद्यं यद्रूपं तद्रूपे
शो नेत्यर्थः व्रीहीति। व्रीहिपदार्थमात्रस्य लोकसाधारणस्य संस्कारानर्हत्वात्तन्मात्रशेषत्वे आनर्थ
क्यप्रसंगादित्यर्थः। नन्वेतावता शास्त्रभेदस्य शेषशेषित्वहेतुत्वं स्यान्न कर्मभेदस्येति कथं कर्मभेदस्य हेतुतो
याध्यायोपयोगित्वमत आह। शास्त्रेति। तन्मते शास्त्रभेद एव द्वितीयाध्यायार्थः न कर्मभेद इति भावः। परिहरति तत्

त्किमित्यादिना नन्ववहननस्य नियमादृष्टानुविद्धातुषविमुक्तिः साध्यं व्रीहेस्तु तथाभूतायागनिर्वृत्तिरिति सा
ध्यभेदात् व्रीहिशास्त्रापेक्षयाऽवहननशास्त्रस्य भेदः किं न स्यात् तत्राह न तावदिति। साध्यभेदमात्राच्छास्त्रभेदे
स्वर्गकामो यजेतेत्यस्यापि नियोगस्य स्वर्गलक्षणसाध्यभेदाद्भेदापत्तेः। नैरपेक्ष्यसाध्यभेदादेव स वाच्यः न चात्रत
याऽवहननशास्त्रसाध्यस्य व्रीहिशास्त्रसाध्यापेक्षत्वादित्यर्थः। अवहननस्य गुणकर्मत्वाद्गुणकर्मणा
च प्रधाननियोगस्यैव लिङा अनुवादांगीकारेण नियोगांतराप्रतीतेर्नियोगविषयस्य प्रधानयागस्यैवाऽनुब
न्धत्वादनुबंधभेदोऽपि नास्तीत्याशयेनाह नापीति। अतस्त्वदभिमतहेतुद्वयाभावान्न शास्त्रभेदः किंत्वर्थ
भेदाद्वाक्यभेदमात्रमित्याह तस्मादिति। वाक्यभेदस्य पूर्ववृत्तत्वमंगीकृत्यापि व्यभिचारेण दूषयति सोमेनेति।
न हि सोमपदं यजेतेतिपदं वाभिन्नवाक्यं एवमरुणायेत्यत्रापीति भावः। ननु सोमेन यजेतेत्यत्र सोमं प्रति याग
स्यापेक्षितत्वेन तद्वाक्योपात्तत्वेऽपि न किंत्वधिकारशास्त्रार्थत्वेन तच्छास्त्रं च सोमेन यजेतेति शास्त्राद्भिन्नमित्यस्ति
तत्र शास्त्रभेदस्य हेतुतेति शंकते नन्विति। पूर्वोक्तेनैव भेदहेतुभावेन दूषयति। न सोमेति। ननु शास्त्रार्थीभूतो
त्यस्य पूर्वपरमापूर्वयोर्भेदादस्ति तत्रापि शास्त्रभेद इत्यत आह। उभयत्रेति। सोमयागस्य शास्त्रार्थता हि का

पेक्षायां पदयोर्व। सिद्धा कार्यत्वेन चाभवेत्स्यसविषयज्ञानस्वरूपेण। अतश्चोक्तलक्षणे पि सोमयागस्यैव विषयत्वेन न त
द्वनुवदुक्कार्यताया अपि भेदाभावान् न पारमार्थिकः शास्त्रभेद इति भावः। नन्वेकत्रोक्तलक्षणे साध्यमन्यत्र परमा
पूर्वमिति साध्यभेदो स्त्वित्यत आह। निरपेक्षेति। उक्तनिशास्त्रसाध्यस्याधिकारशास्त्रसाध्यापेक्षत्वादिति भावः।
इष्ट्येति। इष्ट्यादेर्वत्तस्यतद्धानि संस्ववाक्यविहितयागं प्रति शेषत्वमित्यर्थः। अपूर्वं वेति परमतेन। एवं चेद्व्युक्तकर्मणोः
शेषशेषित्वे भेदलक्षणापेक्षाभावात्साकांक्षी सैव हेतुत्वमित्युपसंहरति। तस्मादिति। तत्रापीति। कर्मणां शेषशे
षित्वेपीत्यर्थः। तद्भावेपीति। निरपेक्षसाध्यभेदानुबन्धभेदाभावेन अवघाताग्नेयशास्त्रयोरपि भेदाभावादिति
भावः। हृत्त्रकोर्तेन भाष्यानुगुण्याहरप्येवमुपेत्याह तस्मादिति। अत एव भाष्यानुगुण्यायदेव। अनुबन्धान्तरमिति। अ
नुबन्धो विषयः। बुध्यमानः। प्रमाणमिति शेषः। भेदलक्षणापेक्षणाभेदलक्षणारम्भः। ननु शेषशेषित्वस्याध्यायार्थ
त्वे कथं तस्यादिति निरूपणासंगतिः स्यादत आह। बहिरिति। विनियोगभावज्ञार्थं विवरणं शेषस्येति॥ ॥शेषः॥ ॥कृत्स्ने
ध्यायेवक्ष्यमाणमर्थं प्रतिज्ञासूत्रेण संगमयति। उक्तमिति। प्रथममिति। विनियोगादिचिंतायाः शे[illegible]षज्ञाना
धीनत्वादिति भावः। हेतुश्चेति। शेषशब्दप्रवृत्तिनिमित्तं चेत्यर्थः। इष्टव्यमिति। अनेन पूर्वमेव व्याख्यातं सम्यक्

सोत्र पंचमी स्यादित्यस्याद्विति सूचितं। लक्षणा सूत्रेन संशयाद्युपेक्षे त्याशयेनाह तत्रेति। भवनमिहोत्पत्तिः स्थितिरिति साधा
रणं। रूपरसादीनामिति तिर्यगानुरोधात्। आग्नेयादीति आदिनाग्नीषोमीयादिः। प्रयोज्यत्वमिति। यो येन प्र
युज्यते स तस्य शेषः न त्वानोक्त दोष इति भावः। पुरोडाशेति। पुरोडाशकपालेन तुषानुपवपतीति तुषोपवा
पः प्रयोज्यस्यापि पुरोडाशकपालस्य तुषोपवापशेषत्वादित्यर्थः। अधिकेति अधिकसंख्या। अंगेति। राजसूयांगा
स्वप वेष्टायामनुमत्यादिप्रधानानामाधिक्यादव्याप्तिर्व्याप्तिरित्यर्थः। विधीति। यद्धि ध्यनंतरं यो विधीयते
स तस्य शेष इत्यर्थः। विध्यादीति। प्रधानविधिरेवेत्यर्थः। अनुष्ठानेति। अनुष्ठानलक्षणस्तु प्रकारमित्यर्थः। पा
रार्थ्येन परोद्देशकत्वं प्रयाजादीनामाग्नेयाद्यनुसाद्कत्वात् तत्र तत्राह परोद्देशेति। परोद्देशप्रवृत्तपुरुषव्यापा
रगोचरत्वं पारार्थ्यमिति तत्र प्रधानस्यांगोद्देश्यकप्रवृत्तस्यगोचरत्वान्नातिप्रसंगः। कर्तृयोगादेः फलोद्देशप्रवृत्तस
ज्ञीभावादिव्यापारगोचरत्वान्नाव्याप्तिः। देशकालयोः प्रधानक्रियायास्तत्रानुष्ठानात्तमेव व्यापारमादाय
लक्षणागमनं फलस्यापि पुरुषेणास्वोपभोग्यतयोत्पादयत्वात्तस्यापि पुरुषशेषत्वोपपत्तिः। नन्वेवं फलस्यादृग
मयं शेषत्वं न स्यादिति शंकते। कथमिति। प्रवृत्तत्वं प्रवृत्तिगोचरत्वं अभिधानेन शक्तोऽस्यार्थः नन्तु विध्यर्थस्य

श्रीराम: ३

शाब्दभावनायाश्चेतनप्रवर्त्तनात्मकत्वेन तद्विषयस्य पुंव्यापारस्येष्टसाधनत्वमात्रेण सिध्येत् इष्टसाधनेप्रव
र्त्तना योगात् न तु शेषत्वघटकमिष्टोद्देश्यकत्वं सिध्येत् न चेष्टसाधनत्वमात्रेण शेषत्वेह ध्यानयनस्ववाजि
नशेषत्वापत्तेः। तस्य क्रत्वर्थतयेष्टवाजिनेसाधनत्वात् तत्राह न चानुद्दिष्टेति। व्यापारस्यापुरुषप्रवृत्तेः॥
विषयत्वं षष्ठ्यर्थः। व्यापारविषयिणी प्रवर्त्तनेत्यर्थः। प्रवर्त्तनाविषयभूतायाः पुंप्रवृत्तेः सोद्देश्यकत्वनि
यमादिति भावः। नन्वस्तु साक्षाद्विधिविषयस्यार्थभावनात्मकव्यापारस्य प्रवर्त्तनात्मकविधिसंबंधात् स्व
र्गोद्देशेषत्वं। यज्यादिधात्वर्थस्य तत्साधनसोमादेश्च कथं विधितश्शेषत्वसिद्धिः। साक्षाद्विधिविषयत्वा
भावादित्यत आह। फलार्थश्चेति। तत्साधनत्वेनेति। व्यापारशक्तिभावनाकरणत्वेनेत्यर्थः। विधिविषयभाव

नां प्रतिधात्वर्थस्य पृथक्कृत्याधात्वर्थं प्रति च सोमादीनां त्ततीयादिश्रुत्या विशेषणत्वावगमात् श्रु
त्यादिसाहाय्येन विधेर्विशिष्टविषयत्वे सिद्धे विशिष्टविधानात्तत्तद्विशेषणानामपि स्वस्वविशेष्योद्देश
प्रवृत्तत्वे व्यापारगोचरत्वलक्षणाशेषत्वं सिध्यतीत्यर्थः। स्वत्रे परार्थत्वाच्छेषत्वं चातद् इत्यर्थः ॥६ प्रमा॥ ॥

बादरिनिरसनस्य प्रकृतासंगतिमाशंक्याह । अपेति । विषयः आश्रयः प्रपंच्यत इति । विमतनिरासेन त्रा
गुरूक्तपारार्थ्यलक्षणशेषत्वं स्थिरीक्रियत इत्यर्थः । द्रव्यादिशेषतायामिहापि संमतत्वात् अवधारणपरत
या सूत्रं व्याचष्टे बादरिरिति । एवकारो यागस्वर्गयोः स्वर्गपुरुषशेषत्वव्यावृत्तिः । अवधारणहेतुमाह उपकार
कत्वाभिप्रायादिना दृष्टेति । व्रीह्यादिद्रव्यस्य क्रियायां अरुणादिगुणस्य द्रव्यपरिच्छेदे अवहननादिक्रियाया वै
तुष्यं च साधनतायाः प्रत्यक्षत्वादित्यर्थः । तत्रापि व्रीहिभिर्यजेत सादिश्रुतिशक्तिसानुनियममात्रपरा उप
कारकत्वं तु प्रत्यक्षमेवेत्याशयः । उपकारं व्रीहिगतातिशयलक्षणं । ननु भावार्थाधिकरणे धात्वर्थः करणमि
त्युक्तं । तत्राह तदेतदिति । ननु स्वर्गकामाधिकरणसिद्धान्तेन धात्वर्थस्य भाव्यत्वभंगानंतरं भावार्थाधिकरण
प्रवृत्तिरिति न तद्विरोध इति भावः । आत्मा पुरुषः । काम्यमानतानुस्वर्गस्य स्वर्गशब्दस्य चंदनादिपरतया क्रिया
शेषत्वेनापि उपपद्यत इति भावः । ननु विधेः प्रवर्तनात्वान्यथानुपपत्त्या पारार्थ्यबोधकत्वमनन्यथाप्रवृत्तिरेव न
स्यात् तत्राह तदेतदिति । प्रवृत्त्यभावो नाहरेरिष्ट इति भावः । कर्माण्यपीति । यागादिप्रधानकर्माण्यपीत्यर्थः ॥
तर्हि स्वर्गकामाधिकरणेनैव गतार्थं तत्राह । फलं चेति । तर्हि द्रव्यादिसूत्रं व्यर्थं तत्राह पुरुषश्चेति । कामवशादि

शा.दी.

स्येनदुपपादयति। नहीति। पश्यतीति। उत्तरगतग्रन्थनत्वादिकमित्यर्थः। विधिवशाद्धि स्येनदुपपादयति। विधिश्चे
ति। आत्मनेपदेति। कर्त्तृगामिनि क्रियाफले तद्विधानादिति भावः। सर्वत इति। द्रव्यादिशेषभूतयागापेक्षया
प्रधानस्वर्गप्रत्ययपित्राधान्यादित्यर्थः। आख्यातेनेति। कर्त्तारं विना क्रियाया अनिष्पत्तेः क्रियावाचकाख्या
तेन स्ववाच्यसंख्याश्रयः कर्त्तागुणत्वेनैवाक्षिप्यत इति भावः। असेति। यजमानेन संमितौदुम्बरी भवतीति
त्ततीयपेत्यर्थः॥ ॥तेषां॥ ॥अत्र सूत्रमाह कदेति। इदानीमिति यावद्बलाबलविचारमिति शेषः। अस्मिन्
पादे श्रुतेः प्राबल्यात्तद्विनियोगः प्राधान्येन चिंत्यते अथ शेषधर्मा इत्यादिसिद्धान्ताभिप्रायेण। किमिति। किमे
ते सर्वेषां शेषाः उत परस्परसंयोगमेवेत्येव संशयः। कर्त्तव्या इति तु शेषस्य प्रयोजनं। परमापूर्वेति। फलापूर्वस्य
र्थेन ननु व्रीह्यादिश्रुतिबलान्न स्वरूपार्थत्वात्स्वरूपसंकर इति नटस्त शंकामनुद्यैव व्याचष्टे। अवघातेति। अ
पूर्वसाधनेति। स्वरूपेणानर्थक्यमभिप्रायस्तथात्वस्य नवमे वक्ष्यमाणत्वादिति भावः। निष्फलत्वादिति। साक्षात्फ
लहेतुत्वाभावादित्यर्थः। ननु यावत्सावाचाकामस्पीनतावत्स्याहीनत्तीयोयामत्र्यादिति वा द्वियमस्यहीनि
योजक तीयावांतरापूर्वप्रयुक्तत्वं न सोमिकपरमापूर्वप्रयुक्तत्वमिति नवमे वक्ष्यते तत्र चेह किं न स्यात्तत्राह नचेति। प्रकर

५

श्रीराम:
४

रोति। नघ्नाच व्रीह्यादिपदेन प्राकरणिकस्य लोकेनांतरापूर्वसाधनलक्षणोति भावः। विभागेहेविन स्वरशाप्र लि२
स्यासत्यविशेषमाशंक्य संनिहितं संबंधमाह। यद्यपीत्यादिना। यागवैषम्यमाह। न स्यादिति। यागस्य तु क्रियाप्रा
त्वेन लौकिकत्वयाज्ञानप्रकारत्वात्प्रयोजकत्वमिति वैषम्यमिति भावः। निष्फलत्वादित्यस्य फलं निरस्यति
परमेति। साक्षात्फलवत्त्वमप्रयोजकमिति भावः। कृतेरिति। व्रीह्यादेः स्वार्थसंबंधपूर्वलक्षणपतितत्वाज्ज
सान्नाय्यसंबंधीति न प्राकरणिकस्य तृतीयस्य पूर्वसाधनलक्षणोति भावः। सत्त्व इति तेषां साकाराणां दृष्टप्रयोज
नत्वेन व्यवस्थया संबंधः। इत्थं। प्रथमेनादिना अग्निहोत्रहवणीं च शूर्पं चेत्यादिः। द्वितीयेन कपालेषु श्र
पयति अग्निहोत्रहवण्या हवींषि निर्वपति। स शूर्पेणाविविनक्तीत्यादिः। साक्षादिति प्रदेयेतयासाक्षात्सा
धनत्वस्य चतुर्थ्यर्थरूपगणीयत्वादिति भावः। अंगेष्विति। समदृशात् त्रिवीजपेयस्य यो भवतीति समुदायार
त्वित्वमिव वाजपेयांगपशुयागद्वयस्यार्थः। अनेनैवेति। आनर्थक्यात् तदंगन्यायेनैवेत्यर्थः। अवयुत्य प्रवृत्ते
कृत्स्न अनेनोद्धननादिवाक्यस्याविधायकत्वात् व्रीह्यादीनामवघातादिसंयोगवदिहसंयोगाभावात् व्य
वस्थेति संगतिः सूचिता। सत्त्वेद्रव्यमपि येन संयुक्तं तदर्थमेव चोद्यते स्फ्येनार्द्रेनीत्यस्य संनोसंयोगात्। अर्थे

शा॰टी॰ ॥ अरुणादिशब्दस्य गुणविशिष्टद्रव्यवाचित्वे द्रव्यस्य क्रीणात्यन्वयसंभवेनावश्यकोपपत्तेर्विचारो व्य-
र्थः अत आह । नैवेति । न चैवमरुणात्वजातिवाचित्वापत्तिः गुणगतजातेर्द्रव्यसमवायाभावेन द्रव्येऽन्वयप्र-
योगानापत्तेः । अतो गुणविशिष्टप्रयुज्यमानस्य नागृहीतविशेषणान्यायेन गुणवाचित्वमेवे-
ति भावः । गुणे सति प्रयोगः असति नेत्यन्वयव्यतिरेकौ । पिङ्गाक्षीति यौगिकत्वं द्रव्यवचनत्वे हेतुः सा-
मानाधिकरण्यमेकत्वे यौगिकानां द्रव्यवाचित्वं अरुणादिशब्दस्य गुणवाचित्वं च वार्तिके प्रपंचितं ।
नन्वेकस्य द्रव्यस्य विधौ किं मास्तु येन नेत्रादौ गुणाधिक्यमिति । नहीत्यर्थः । शक्तिलक्षणाकृतवैषम्यमपि
नास्ति येनैकस्यैव विधायकत्वं स्यादित्याशयेनैकस्यैवैकत्वं । बहुव्रीहेरप्यन्यपदार्थे शक्तिरेवेति वार्ति-
के साधितमिति भावः । प्रकरणेनेत्येकपदत्वेन तृतीयाप्राकरणिकसर्वद्रव्येष्विदर्थः प्रकरणस्य स्वान्त-
र्गतगुणविनियोजकत्वाभावेन यथाश्रुतायोगात् । तृतीयेति । यद्यप्यत्रारुण्यादिविशिष्टक्रयविधानात्
हुस्थितदधिकरणोक्तरीत्या मत्वर्थलक्षणाप्रभावेनानयान्तरीयपामत्वर्थलक्षणयारुणाद्यानिपदि
कबोध्यक्रयगतमेव कारकत्वं प्रतिपाद्यं तथापि प्रतीयमानक्रियाकारकसंबंधापरित्यागेनैव क्रयस्य

5

श्रीराम: ५

त्त्वणीयत्वेन आरुण्यस्य कारकत्वमिति बोध्यं। अनुपात्तानीति। क्रयकरणस्य साक्षाद्गुणविनियोजकत्वा
भावेन गुणो विधेये केनचिद्धेतुना द्रव्याद्यद्वारा स्वान्वयकत्वादिति भावः। तथापि विशिंषन्ती सतेन कारकशब्देरेव क्रि
यान्वययोग्यत्वं न तु तद्विशिष्टद्रव्यस्येति सूचितं। आरुण्यस्यैकेनैव पदेनोद्देश्यविधेयोभयापर्ण एकप्रसरताभं
गदोष इति शंकां निरसितुं विधिप्रकारमभिनयति। येन द्रव्येणेति। अरुणापदेन साकमन्वययोग्यत्वेनैयां
ने प्राकरणिकद्रव्यवाचकं पदं कल्पयित्वा तेन प्राकरणिकं द्रव्यमनूद्यारुणागुणो विधीयते। न चैवमरुणागुण
स्य प्रकाशस्यैव विधावरुणापदे लक्षणागौरवं पृथगंशांशं कल्पनीयमिति वा। तत्पदेन द्रव्यं विना सामानाधिकर
ण्यापत्तदोवयकत्वादित्याशयः। वाक्येति। एकं साम एकहायनीविशिष्टक्रयविधानार्थमपरं प्राकरणिक
द्रव्येऽरुणागुणविधानार्थमिति वाक्यभेद इत्यर्थः। परिहरति मैवमिति। ननु मामभूद्वाक्यान्तरविधिः एकहायन्येव
अरुणगुणस्यैव न्यायेन रशादृष्टयेन विधीयतां तत्राह एकहायनीति। स्वशब्देति। पिंगाक्ष्येकहायनीशब्दस्यार्थः। न
पुनरीति। विहितो विध्युपयोगात् पिंगाक्ष्येकहायनीशब्दयोरसमस्ततिद्धत्वात् विशेषाद्विनिगमनेन सगुणपदं हि धा
यकत्वादिति भावः। अपेति। अरुणाविशिष्टैकहायनीविधिरस्त्विति पर्यवसितोऽर्थः। अन्यथा त्वनैक

शा०टी०३ वा कत्ता इङ्गं स्यादिति भावः। तृतीयां तस्यारुणाशब्दस्य क्रियान्वयत्यागेन एकहायनीविशेषणत्वायोगा
त्। एकहायन्यारुणेनै गुणो विधातव्यः। तेन तस्य विरुद्धत्रिकादिदोषः स्यादिति परिहरति। नैवमिति। स्वार्था
उपदेशा। परार्थमुद्देश्यविधेयत्वविलक्षणत्वाद्वाक्यभेदाद्वाक्यभङ्गुलक्षणः सम्बन्धयानि समभिप्रेत्य स्वरूपतोऽप्याह
स्वभावमाह। प्राकरणिकानीति। गुणस्येवेति। ननु गुणवतो द्रव्यस्य स्वार्थः। परिच्छेदः द्रव्यान्तराद्व्यावृत्तिः
ननु तृतीयासाक्षात्साधनत्वं ब्रवीति न द्रव्यपरिच्छेदसत्त्वेन तत्राह गुणाहीति। साधनत्वमेव तृतीयार्थो न
तु साक्षात्साधनत्वमिति भावः। तथापि गुणस्यैकहायन्यामेव क्रयेऽनिवेशो न तत्राह। यदा चेति। एकहायन्याः
परिच्छेदके गुणस्य च परिच्छेद्ये आकाङ्क्षासत्त्वादेकवाक्यगतत्वाच्च परस्परं नियम इति भावः। एकहायन्यामेवे
त्यवधारणमयुक्तमिति शङ्कते। नन्विति। प्राभाकरास्तु गुणक्रमेणासाध्यभेदान्न भेदः प्रकृते च सोमस्येव
सर्वत्र साध्यत्वात्क्रयभेदः स्यादुक्तं तदनुपहृष्यति। उक्तसन्निधिशिष्टद्रव्याक्षेपोऽधेन द्रव्यविध्यसंभवात्। सर्वत्र क्रय
विधिनिश्चयसति विहितविधानानुपपत्तिन्याय एवं द्वापवेति। नहि तत्र साध्यभेदः। सोमरससंस्कारस्य साध्यत्वे श्री एम
कत्वादिति भावः। दर्शितत्वान्नेत्येवेति शेषः। अविरोध इति। सोत्र क्रयराशब्देभाव साधनो न तु करणसाधन इति भा ६

येत्विति। न्यायेति। ३

वः॥ एकत्व॥ एवमिति। तेषामर्थैनेत्यधिकरणेन संमार्गस्याप्यसंयोगेग्रहशेषत्वे सिद्धे संयोगप्रकारद्
हानीचिंसनइति श्रोतविनियोगविनारूपत्वादस्याध्याये संगतिः। यथा संयोगशेषत्वे सिद्धे एवं नहि शेषचिंता
संगच्छतइत्यनेनतरसंगतिश्चेति भावः। संख्येति। उद्देश्यविशेषणमात्रोपलक्षणं उपादेयेति। पशुनायजेतेत्या
दौउपादेयपशुगतसंख्यास्विहितस्यार्थः। नहिश्रुतत्वमात्रेण विवक्षा किंतूपेक्ष्ययोत्रेक्षतेचसवेयग्रहाणां संमार्गोऽ
वधारणेनऋपेक्षाविरहात्वे श्रूतस्यापिनाविवक्षेति सिद्धांतमाह। उद्देश्येति। उद्देश्यग्रहव्यक्तीनामुपलक्षणं
ननुसर्वयमुद्देश्यतेनेनः किंतत्राहयइत्यमिति। नतस्य किंतद्वाह। सर्वेस्यतिपद्धीत्या जातेरुपलक्षणत्वमुक्तं नदृश्य
यतेव्यावर्त्यपदीति। श्रमर्त्तेवादिति। संमार्गयोग्यत्वमुक्तं श्रमसाधनत्वादिति साक्षन स्याहि संस्कारः नचजा
तिस्तथापधापिग्रहविधिवाक्येग्रहशब्दवाच्यजातेर्व्यपरिच्छेदकतयासाधनत्वमवगतंतथापिसोन्नादुपयो
गाभावादावश्यकत्वाच्च व्यक्तीनामेव संस्कारइति भावः। नस्यागमित्यस्याशयविवृणोति। तत्रापीति संस्कृतानि
निद्धितीयोतोविषम्यमाह। प्रयोजनवत्वाच्चेति। प्रतिप्रधानमिति प्रधानकार्यार्थोगुणः नतु तत्त्वरूपार्थः त
द्याचानाद्वत्रेयस्यैवप्रधानस्यगुणेनकृतेः। नत्कार्येवैगुण्यं स्यादिति भावः। पूर्ववदिति विधेयगतत्वे हेयाया

१ श्रा. टी.

मित्यर्थः। विधानुमितिपक्षेपि एवं पक्षे संख्यान्वये विधेयत्वेनाभिमतानां यथापि वस्तुमात्राश्रीत्या उद्देश्यकोटि
निवेशासंभवाद्विधेयतुच्छेव संख्याविवक्षा वोच्यासापि नसंभवतीत्यभिप्रायः। न्यायतः सर्वेषु ग्रहेषु संमार्ग
व्यापारेपि संख्याविधौ दोषमाह। विधीयमानमपीति वाक्यभेदमप्याह नचेत्यादि ग्रहं संमृज्यादित्येकवचन
व्यक्तिः एकमेव न तु ग्रहान्तरमित्यन्वयान्वयापत्तेः। अत्र विधिशब्दः उद्देश्यविधेयसाधारणविधिसंस्पर्शि
परः एवं श्लोकस्थविधेयताशब्दोपि प्राधान्यपरः विधेयतासंभवेन यथाश्रुतानुपपत्तेः। ग्रहस्येति किमेक
त्वं ग्रहसंबंधि सद्विधिसंस्पर्शि संमार्गसंबंधि सद्ग्रहाच संमार्गसंबंधितदा संमार्गापेक्षया प्रधानमुत्तरगुणः
सर्वथा वाक्यभेदः स्यादित्यर्थः। सर्वेषामिति संमार्गेनान्वयिना तेन ग्रहान्तरेषु संमार्गसंबंधितदसस्य
व्यावर्त्तयितुमशक्यत्वादिति भावः। तानमिति तानेहि उद्देश्यविशेषणं भवतीत्यर्थः। एकत्वविशिष्टस्य
नियग्रहनिष्ठोद्देश्यतावच्छेदकतया एकत्वस्य ग्रहविशेषणत्वं तिन्निर्वहिक स्वग्रहे कत्वसंबंधो लोकतो नि
श्चीतः इति भावः। सर्वत्रेति। एकमेव संमृज्यान्नतु ग्रहान्तरमित्येवं वाक्यार्थलाभो हि एकत्रसान्नवसेसोत्ती
तिभावः। एकत्वविशिष्टस्य ग्रहस्य संमार्गविधौ ग्रहस्य प्राथम्यतः एकत्वान्वयो वाच्यः न चासौ संभवी स्याह। अ

श्रीरामः

७

पिवेतिं संमागोन्वितं सहितमिति संसर्गीति पदं संमोपपत्तिकमुक्तं यायेषेति । अथेन हवीति । ततरति । ए
कत्वस्य कारकेणान्वये ग्रहस्यापि कारकेणैवान्वयात्स्वरसतमन्वयेन प्रत्येकमुद्देश्यत्वाद्वाक्यभेद इत्य
र्थः । नन्वेवं पशुनेत्यत्रापि पशोः एकत्वस्य च कारकान्वयात्संभिधेतरतो वैषम्यमाह उद्देश्य
योरिति । उपादेययोः पश्वेकत्वयोः पृथक्कारकान्वयेपि क्रियागुणत्वात् क्रियावशीकृतयोः संगप
देव क्रियासंबंधे सकृदेव विधिव्यापारात् न वाक्यभेदः । उद्देश्यस्थले तु क्रियायां ग्रहैकत्वप्रतिगुणत्वात् ।
तयोः प्रधानतया क्रियावशवर्तित्वाभावेन प्रत्येकमेव क्रियान्वये पश्वेकत्वोभयविशिष्टक्रियावोद्विशिष्टे
कार्यस्याप्रतीतेः प्रत्येकं विधिव्यापाराद्वाक्यभेद इत्यर्थः । न कुत्रचिदिति । एकवचनं जात्यभिप्रायेणानुवादक
मिति भावः । सत्वे एकत्वसमभिव्याहृतं संमार्गादिकमेकस्यैव स्यान्नुष्कृतिसंयोगात् ॥ ॥ संस्का ॥ ॥ ने
नुष्कृतस्योपलक्षणार्थत्वेकापि यथासंयोगव्यवस्थानस्यादित्यस्वरसादाह । अपिवेति । नहीति सोमेनय
जेतेत्यस्य च्चेरेकत्वादिति भावः । न चापेक्षाविरहादविवहेत्याह । अव्ययमिति । अयोगादिति लक्षणकंक मि
कत्वादिति भावः । ननु यहाभ्यासप्रस्तुतकाप्रवेसाधनोद्देशेन समार्गे विधौ विशिष्टोद्देशदोषादप्रर्वेसाध

२३

शा. दी.

नमात्रोद्देशेन च समसाधारणं यस्याद्देवे तत्राह। अन्तश्चेति। न यथाभ्यासप्रवर्तितेनाशंवंलिङ्गेनैः किं तु प्रवर्तितेनैव तन्तु प्रसा
सत्यायहाभ्यासापूर्वमेव सिध्यतीति भावः। सत्रे समागीर्दिगुणान्वाच मसादिसाधारणपं स्यात् तेषां संस्कारत्वेना
पूर्वसाधनत्रिवेपितेन च मसानामपि तत्साधनत्वाविशेषात्॥ ॥अनेन॥ ॥संस्कारविनियोगविशेषचिंतानंत
रगुणविनियोगविशेषचिंतनात्संगतिमाह॥ तत्साधनेति। चमसादीनामर्हत्वप्राप्त्यभावे समदशारत्नित्वायो
गाहृध्वत्वसादृश्येन तत्र प्रपपदन्यपेनायोगाच्च नहार्त्वमिति भावः। बहुव्रीहेर्विशेष्यापेक्षत्वात्षष्ठ्यो तस्य च तदस
मानाधिकरणस्य विशेष्यत्वासंभवेन साक्षाद्वाजपेयोद्देशेन समदशारत्नित्वविधानमयुक्तमिति रुचेरा
१५ ह। यद्वेति षष्ठीसंबंधिपर्यंतानतु संबंधमात्रपर्यवसितेति भावः। इतरत्रापि प्रवर्ग्यवन्नोपिजयन्यत्वान्न। पुष्पाकृतत्वा
न्मुख्यत्वात्। प्रथमश्रुतत्वात्। ननु प्रपस्य वाजपेयांगत्वादन्यस्य च साक्षात्संबंधस्याभावात्कथं वाजपेयस्ये
तिषष्ठी तत्राह। षष्ठीति देवेति देवदत्तस्य नप्तेतिवदित्यर्थः। देवदत्तस्य नप्ता साक्षात्पुत्रद्वारैव संबंधः न साक्षात्तेन च
तत्रापि देवदत्तस्य नप्त्रानान्वयः। किंतु नप्तृशब्दार्थैकदेशेन पुत्रेणातेन च साक्षादेव संबंध इति वाच्यं पदार्थैकदेशेना
न्वयस्य क्वचिदपि विरुद्धत्वादिति भावः। संबंधमात्रमिति। उपकार्योपकारकभाव एव संबंध इति भावः। स्वर्वे पन्नसा

श्री रामः ८

धर्महेतुत्रयं निरस्यति। अनंतरेणेति। वाजपेयस्येति नोद्देश्यविशेषणं येन सामान्यसंबंधस्यौचित्येन स्वी
कार्यत्वाद्यादित्याशयेनाह साचेति। प्रकरणादिति। अधिकारादित्यर्थः। नतु इतिकर्तव्यताकांक्षालक्षणात् स
प्तदशारत्नित्वस्य पश्वंगस्य वाजपेयकथंभावग्रहणायोग्यत्वात्। सत्रे सप्तदशारत्नित्वादिकं प्रधाने वाजपेये
आनर्थक्यान्नदंगेष्विति न्यायेन। कर्त्रे। अभिक्रमणक्रियायां साक्षाद्धोमार्थत्वासंभवेन प्रयोज्यार्थेन कर्त्रे रू
दे पांगावत्तानैं ह्रिजेन हिंशोषविचारान्नसंगतिः जुहोतेः प्राकरणिकसर्वहोमविषयत्वेऽपि कवा [illegible] कपत्वेपि त्रया
जमात्रे निर्वचनान सिध्यतीति मत्वाह। जुहोतेरिति मूर्त्तिविवर्जितममूर्त्तेः अनुपादानादिति आख्यानस्य कर्तृवा
चित्वाभावादिति भावः। विच्छिन्नमिति। जुहोतिमात्रं चानुवाद्यतया कथं विधेयमिति भावः। ननु प्रकरणेनापि
क्रियासंबंधबोधने तुल्यमयोग्यत्वं तत्राह संभवतीति प्रकरणेन क्रियाकारकभावो न बोध्यते किं त्वंगांगि
भावः। सत्त्वक्रिययोः संभवस्तेव वाक्यान्न तु क्रियासंबंधः कारकभावेनेवेति वैषम्यमिति भावः। सामर्थ्यादिति कर्तु
राहवनीयसमीपदेशोपापकत्वसामर्थ्यात्तत्कर्तृसंस्कारकमित्यर्थः। सन्नावेति अनएवातिष्ठन्नन्वाहेत्यादौ अ
नुपात्तस्याप्यनुवचनकर्तुः स्थानादिद्वारत्वमिति भावः। नक्रियात्र इति धातुसंबंधे प्रैयाइस्वधिकृत्य नेमुलो ५३

1

विधानाद्भिक्रमणस्यापि समानकर्त्तृकतया जुहोत्यन्वयोपपत्तेरिति भावः। अवदानेरिति। अङ्गानामिति कर्त्त
व्यताकाङ्क्षाश्रवान्तरप्रकरणाद्धौ फलवदिति फलवत्याः प्रधानभावनाया अकृतायाः कथम्भावाकाङ्क्षोदयवत्तित
यावष्टम्भाद्विधीयमानानां प्रयाजादीनामाक्रम्यमाणत्वेन परार्थत्वेनोपस्थितानां तेषां स्वयं प्रधानभाव
प्राप्त्यसार्थमिति कर्त्तव्यताकाङ्क्षेत्वमिति भावः। फलवद्भावनायाउद्भूतजाताकाङ्क्षेकथम्भावे निरोहितनाः समा
साः तमेन तस्याय योक्तकथम्भावास्टथगवान्तराकाङ्क्षयांगानांकथम्भावानेवप्राहुष्युतीरा त्वस्योजना तेहीयेति।
ननु भाष्यपूर्वपक्षवहोमाहोमसाधारणे एवं जुहोत्यन्वयापरित्यागेनैव भावनासंबन्धादिति भावः। बार्हिरिति
यथा बार्हिषि हवींष्यासादयतीति प्रकरणाद्बर्हिषः प्रधानभावनान्वयेन दीयांगप्रधानहविरासादनार्थत्वं य
था वा बर्हिर्लुनातीति लवनादीनां प्रकरणाद्बर्हिषोऽङ्गप्रधानार्थत्वं तद्वदित्यर्थः। वाचेनेति। जुहोतेः सन्नि
हितप्रयाजविषयत्वादिति भावः। संनिधानाद्युतिसंकोचो न पुनः इत्याशयेनाह नेवमिति नन्वभिक्रमणात्
पूर्वप्रयाजशास्त्रोच्चारणेन गुणविधिरस्तित न त्वनोन्नमप्रयाजमात्रस्य सन्निधिरित्यस्वरसादाह। तथेति। नान्य
थामिति। ततश्च बर्हिरादिधर्माणामंगप्रधानार्थत्वंवत्समाख्याविरुद्धेनेति भावः। यत्रत्यगोदेशेन किंचिद्विधी

पं

श्री रामः
९

यते। तत्राव्यभ्यंपंतदंगस्य कथंभावाकांक्षोत्थापनीया सा च परस्तादयिष्यदि किं चिदंगो देशेन विधीयते ता
वत्सर्वत्र मनुवर्त्तेत इति स्वीकर्त्तव्यं। अन्यथा परस्ताद्विधिः स्थलोपेपूनशाकांक्षोत्थापनाप्रसंगेऽरव्यप्रसं
गात्। नयोऽस्य संयुक्ते या मेध्येयदंगमसंयुक्तं विहितं नहृत्युक्तां गाकांक्षानहृत्तो विधानार्थं सन्निधिविशेषा
द्योगस्यैवांगं नतु प्रधानस्य त्रन्नभिक्रमणं चजातं तस्मादंगांतरप्रकरणे नाभिक्रमणं प्रयाजांगमिति सि
द्धांतयति। भवेदेवं यदि जाव चनेनि। प्रयाजशेषहृक्तं वामाशमियोज्याइति यावत् समानायतन इति उपभृतस्त
कोऽपानतु श्रोपभृतो ज्यस्य अर्द्धं जुह्वां समानयत इत्यस्यार्थः। अत्र प्रयाजशेषाभावेऽप्योपभृतो ज्यस्य प्रया
जानुयाजार्थत्वात् प्रयाजार्थस्य च समानेयत्वात् प्रयाजशेषहृक्तत्वस्य त्वादेवमुदाहृतं यावाइति। अ
त्रार्थवादत्वात् कस्याप्यविधानेपि प्रयाजशेषसंयोगेनेतद्वद्व्यक्तिप्रदर्शनायेदंयहृतं। भि नेवेदेति धु४
वेदनं कर्मांगं तया विधीयत इत्याशयेनेदं। नन्वेवं गानां त्वया कथंभावाकांक्षा गीकारात् ततएव प्रयाजांग
मस्तु किं सदर्शनेनेति चेत् स्वदर्शकामा शाम वीर यति यद्यपीसादिना निष्फलत्वेनेति तन्नस्य विनिगमना
विरहेऽर्गात्त्रेणकथंभावाकांक्षाया विनियोजकत्वशक्तिः कुंठीभवतीति भावः। यस्त्विति। प्राभाकर इत्यर्थः। स

×घारित्वमिति॰ असंबंधिपदानां वस्त्वंतरभूतत्वादेकत्वेन सर्वेष्वनुबुद्धिविच्छेदकत्वमात्रं न त्वाकांक्षाविच्छेदकत्वमि
त्यर्थः॰ स्युरिति॰ न तथासंबंधिपदं दृष्टान्तत्वं भावि भिन्नेष्वपदार्थेराकांक्षाशांतिर्वाच्येति भावः॥१२×अध॰

धिकाराणां फलवत्त्वान्निष्फलमनन्यशेषं च विशेषादिति च्छेदः वाचनिकेति इदं ऊर्ध्वो ध्वर इत्याघारमाघारयती
ति वाचनिकमन्त्रादिभिरित्यर्थः। आचमनादिभिरिति तेषां सर्वकर्मसाधारण्यादिति भावः। रवीति। तेषामपू
र्वत्वाद्वाचनिको योगे वा निराकांक्षत्वमित्यर्थः। सत्रे अभिक्रमणे होमस्य कर्मसमवायान्नहेत्वालंकृत्यरण इति
10 वा समभेदः जुहोति विच्छेदस्यादिति भाष्यपक्षे आचार्यपक्षे तु कृत्युरणेऽभिक्रमणाङ्गानामितिकर्तव्यताकांक्षा
विरहेणाप्रयाजकर्मसमवायाद्वाक्यभेदः प्रयाजवाक्यानन्वयः स्यादिति॥ ॥सेदिग्धे॥ ॥अनेनेति॥ क्रोंचमे
ऽभयमध्यस्वरेणेति यावत्॥ अवान्तरप्रकरणप्रसंगात्तत्स्वरूपनिर्विचार इत्याशयेन तदर्थसंशयमाह॥ नद
र्थमिति॥ वाचनिकेति॥ त्रिः प्रथमामित्यादिविहितेत्यर्थः॥ लिंगाभावेऽप्यवान्तरप्रकरणादेव निर्विदांसामिधे
न्यंगत्वसंभवाद्दध्यवधायकत्वमित्याह॥ यद्वेति॥ नादेयत्वं सामिधेन्यंगत्वं॥ अंगैर्निर्विदि॥ प्रधानानि सामिधे
न्यः न न्वेवमपि काम्यगुणानां पुरुषार्थत्वयासामिधेन्यर्थत्वाभावान्नेर्विच्छिन्नं सामिधेनीप्रकरणं तत्राह का
म्येष्विति॥ तासां सामिधेनीनां॥ आश्रित्य विधानस्य च न्याय्यप्रकरणविच्छेदकत्वमिति भावः॥ लिंगेनेति॥ ता
सामग्निप्रकाशकत्वादिति भावः॥ तत्र स्वयंशक्ते नन्वितिप्रकरणतेन तासामभिलिपुनःशक्त तत्रेति॥ अ
यवधानादित्येन तासां वकाम्यस्यांगमिति स्वनिते॰ विकृतिलाल्लालि प्रकरणमिति परिहरतीति नेति॰ आश्रयत्वेन ता
सामनुवर्तनमर्थान्निराकुर्वन्निर्विकृतित्वं विशदयतीदृहोति॰ विच्छिन्नेति॰ निर्विकृतिरिति भावः॰ अनुवदन सामान्ये पुरोवा

२५ मन्वोहत्यादिधर्मातिरवदतीतिदिध्यतइत्यर्थः नतुनिगदानंतर्यादिकतुमध्यप्रयोगइत्ययुक्तं २
क्याद्वचनातिप्रसक्तमितिसंख्यायुक्तेस्तुक्तं अनुवचनांतरविधौतेषांक्रतुमध्यप्रयोगं समर्थयतेऽनुशब्देनेति· तत्रनित्य
सामिधेन्यनुवचनेपंचदशानुवृत्त्यादिसमुशब्देनयोयंनिगदानंतरभावुक्तः सोयत्रकाम्यानुवचनेपिप्रि:प्रथमांक्रतोनि

गदानंतरं नित्यसामिधेन्यनुवचनस्यकृत्वेयतयातद्व्यवधानेनकाम्यानुवचनस्यनिगदानंतर्यासंभवा
त्। अतत्राहेनेरेवेति। द्वादशेति। ज्योतिष्टोमप्रकरणोद्दादशाहीनस्येतिहृस्याहीनानुवादेनद्वादशोपस
त्त्वविधिवदित्यर्थः। नन्वेवमभिक्रमणानंतरप्रयाजेधर्मविधेरध्यिष्ठुरस्यानुवादेनसंभवाद्दवानरप्रकरणा
त्के दृष्टव्यस्यादित्यस्वरसोदाहायेदृति। तदभावादितिनिविड्ध्यविधानादितिभावः। आघारेति। सामिधेनीकोत्क
नस्यपराध्येत्वान्नत्वहलात्सामिधेन्यनुवृत्तिरित्यर्थः। ननुप्राभाकरमतेनेऽवांतरप्रकरणाभावेपि संनिधि
नासामिधेन्यंगत्वप्राप्तोसन्निधिविघटनार्थमधिकरणमित्याशंक्याह। सन्निधेश्चेति। अपेक्ष्यमाणमिति॥
क्रियायाः सकर्तृकत्वमित्यमादेकस्यैवपदस्यपर्यवसितार्थत्वात्पदांतरार्थापेक्षत्वाच्चेतिभावः। कर्त्रीसामि
धेनीकर्त्री। अन्वीयतइति। एवंचसन्निहितेनसामिधेनीकर्त्रैकवाक्यतापन्नमुपवीतंप्रकरणाद्दृष्टप्रबलेनवाक्ये
नसामिधेन्यंगमेवस्यादितिसन्निधिविघटनार्थमधिकरणमितिभावः। अप्रवेशेप्रधानाप्रवेशेति नन्वप्रत्य
क्षेपि सन्निहितसामिधेन्यपूर्वमेवप्राप्नोत्यत्राहावश्यंचेति। एवमिति। एकपदमित्यादिसूत्रकारीत्यर्थः। वि
छिन्नमयीति। कथंभावागृहीतमपीत्यर्थः। स्यादिति। तथाचैकंसंधिन्यसतोऽपरंप्रत्यपचतइतिन्यायोपातइतिभा

× अधिकारापूर्वं प्रधानापूर्वं· नदश्रुत्यतिवाक्यास्यावल्पंदर्शितं· ननुपदस्थसाधिकारापूर्वसंबंधेपितत्रद्धारोपस्था
यांसंनिहितसामिधेनीकर्तृवक्षार्थस्यादितितन्निरासायधिकरणमित्यरुचेराहापिचेति· ×२

वः। ननु उपध्यानस्यारब्धात्तेन साध्यतयाप्रतीतेः साध्यस्य च साधकतया गुणभूते कर्त्रादिभिरनभिधानापर्यं
वसानात्सन्निहितस्याभिधेनीकर्त्रान्वितं सत्तदभिधेयस्याद्भिज्ञमगस्यतु गुणभूतत्वेन सिद्धतयाप्रतीते
र्गुणभूतकर्त्रादिनापेक्ष्या किंतु मे विभक्ते। सच लक्षणा। आकूरणाकर्त्रीप्रसज्येतेति तन्निरासाय सर्वो थि
करणाभिसाध्यत्वेन शंकते। नन्विति। यद्यपि शेष्यपेक्षा तथापि शेषित्वेनैव सन्निहितकर्म्मान्वितानाभिधानं सेत्स्य
तीत्याशंक्याह। नचेति। शेषिणायोग्येति। ब्राह्मणो हि रूपशेषिणेत्यर्थः। अस्यात्मभिदमुच्यत इत्याहापि चेति। न
केवलं दृष्टान्तसत्त्वादेव शेषिणान्वितानाभिधानं किंतु प्रकारान्तरेणान्विताभिधानानिर्वाहादपीत्याह। अपि
चदर्शितेति। योगुणभूतः कर्त्रादिनेतिपदत्राध्याहारेणायोज्यः प्रकारान्तरेणान्विताभिधाननिर्वाहं शंकते
प्रधानेति। ननु मास्त्वभिधानं अनभिहितस्यापि ग्राहकान्वयसंभवादिति शंकते। स्यादिति। नत्वेकपध्यानस्या
पि सन्निहितकर्त्रान्वयो नेस्यादिति परिहरति। उपचीतेमयीति। अनुष्ठानं भूत इति निवेकत्वेन गुणभूत
इतियावत्। अनभिहितस्येति। ग्राहकलिङ्प्रयोजनप्रयोजनाभावेनाभिधानोत्तरभावित्वात्। शेष्यपेक्षा
या इति भावः। क्रियास्वाभाव्यादिति सिद्धत्वेन प्रतीतस्याप्याश्रयत्वेन तदपेक्षत्वादिति भावः। सूत्रे अथातरङ्गे

करणानुवृत्तिसंदेहे हेनिविद्भिर्वैवधानात्तउपव्ययत इत्यस्यसामिधेनीवाक्येन एकवाक्यताभावः स्यात्॥ ॥
गुणानां॥ ॥यज्ञावचरोयत्नानुष्ठानहेतुरिति यावत्। आधानप्रकरणे श्रुतानामपि इस्संगतत्वशंकासं
भावयितुं यत्तसंक्रुत्वानीत्युक्तं। इष्टिसान्निध्येनवाद इत्यसति संभवे सन्निहितगामित्वेननतदंगत्वायसा
सिद्धांतेनासिध्येदिति प्रदेशान्तर इत्युक्तं। आनर्थकेति। अनेनाभिक्रमणोपव्यानयोरानर्थक्यतदंगत्वा
येनकर्त्रन्वयसिद्धिमुपज्ञोव्यत द्विशेषेविचारितेसंभ्रतितस्यन्यायस्यापवादः क्रियत इति संगतिस्तस्यचिना
श्रयह्रुतत्वादिति। अनंगत्वे प्राधान्येनप्रकरणित्वेपिप्रदेशान्तरान्नानासात्रस्थलेतत्र्यकरणानुवृ
त्तिरिति भावः। द्वितीयेति। अग्नीनादधीतेति द्वितीयेत्यर्थः। निष्पादकत्वमिति। आधानोपकारद्वारे
तिशेषः। प्रस्मरणात्तद्विस्मरणात् साहान्तवधेयभावमपकत्वात्साध्यात्मकएवपर्यवस्यतीत्याहाव
श्यंचेति अवघातस्येवेति तथात्वदभ्युपगमादिति भावः। तत्सिद्ध्यर्थः साक्षात्संवधासिध्यर्थं साध्यत्वं। अ
ग्नीनांहविः साध्यत्वेनन्ववघातस्येक स्थलचरावंगत्वेनोपदेशाविरोधः इह तु आधानप्रकरणे रूपोपदेशा
वगतसाध्यत्वविरोधोस्तीति वैषम्यमिसस्वरसासहापिचेतेति। आर्थिक इति आत्तयांगिक इत्यर्थः आर्थि

शास्त्रा०

कस्यनातिदेश इति भावः। ननु प्रकृताचंगत्वबोधकशास्त्रस्य क्रियाकारकभावोप्यर्थ एवेत्स्वरसादाह
प्राहिष्यपत्तावेति। येनकेनेति। यथा प्रकृतिकारकत्वेनैवेत्यर्थः। न च तदानीमनिष्पन्नत्वादाहवनीयस्य कार
कत्वासंभवः तर्हि साक्षात्साश्रयस्य क्रियाकारकान्वयस्यैवाप्रवृत्तेः निराश्रयं साक्षात्कथमतिदिश्यतेति भावः।
कत्विति। आधानेत्यर्थः। हविषामित्यादिः। आदिशब्देनांगत्वादाकं साध्यत्वमग्नीनामिति शेषः। नो चेद्धवि
पवमानहविषामाधानप्रकरणाग्रहणानंगीकारे तेषां विश्वजिन्न्यायेन फलकल्पनया आधानाद्यपूर्वभावा
दग्नीनामेवुतैर्थत्वं स्यात् न त्वंगत्वमर्थं से हविषां स्यादित्यर्थः। ननु न प्रकरणेनाग्नीनां साध्यत्वं येनोक्तदो
षः स्यात् किं त्वाह कथं हरणेन तथा हि अग्नीनादधीतेति साध्यभूताः क्रतूपयोगित्वेन तत्र योजनं वंतस्था
ग्नयः। अधिकारविधिरेव स्वसन्निध्याम्नातान्पवमानहविषि स्वार्थत्वेन गृह्णातीत्येवमग्नीनां साम म
न्यतः पवमानहविःसाध्यत्वसिद्धौ अतिदेशबलात्संबंधरूपं न हित्याश्रीयते। तत एव चेष्टीनां निराकांक्षाणां बा
नफलकल्पनापीत्यस्वरसादाहास्त्रवेति। उपदेशोतिअतिदेशात्प्रबलेनोपदेशान्मक्रमेणाधानद्वारेणाग्नी श्रीरामः
नां पवमानहविःसाध्यत्वाच्च मामाक्षिप्यर्थः। नन्वाधानस्य प्रकरणं नास्तीति गुरुमतानुवर्तिमिलकत्वान्नेप्रकर १३

प्रकर

इति। ननु साक्षात्करणांतरधारकत्वं नत्वोपस्यपूर्वधारत्वेप्यस्तीत्यत आह प्रहापिरेति। अंगभूतेनेति। अवयवस्य
नेनेत्यर्थः। परमतेप्रक्षेपस्य प्रधानावयवत्वांगीकारेणांगत्वाभावात्॥ सप्तमीचेति। नयतोदिकर्मकत्वे x ९

णाद्याधानद्वारत्वप्रसक्तिरित्यत आह हाहापिचकारणात्वेन नत्वानीयमानद्रव्यादि व्याप्यतया प्रधानकर्म
त्वेन साध्यत्वेपि पष्ठ्यापप्रसिद्धिप्रमीत ये हेत्यर्थः। अस्तस्य पीति। हविषामाधानार्थत्वेनानर्थकात्वं हंगस्यायेनपा घ ३
त्राणामाधानांगहविरर्थत्वं स्यादिति तद्द्वारेणोन सर्वपृज्ञार्थत्वसिध्यर्थं हविषां यदष्यर्थत्वप्रतिपादनं तदर्थ्य पां ४
पात्राणां प्रबलेनवाक्येन यज्ञशेषणाद्दुर्बलेन प्रकरणेनाधानांगत्वस्यात्र सक्त्वाह हविषामाधानांगत्वेपि पात्रा
णां तन्नाभावात् सप्तमीचेतिन यतोदिकर्मकत्वेन नत्वानीयमानद्रव्यादिव्याप्यतया प्रधानकर्मत्वे तेन नव
नोरदिवेच हृष्यावाक्यांतरकल्पनमित्यर्थः। ननु प्रबलश्रुत्यवरुद्धानामप्यदुर्बलाद्दीनां प्रकरणेन क्रतावि
वयात्राणामाधाने निवेशः किं न स्यात्तत्राह। व्रीहीनिति। साधनेति। प्रकृतापूर्वसाधनेत्यर्थः। इहलिति। यद्यपि
यज्ञस्वरूपस्यापि लोकसिद्धतया तदर्थत्वे पात्रनियमानर्थक्यादपूर्वार्थत्वमेव पात्राणां तच्च लक्षणया वक्तव्य
वाद्वियमोपि द्वीहरायावंतारापूर्वार्थः नृतन्त्वरूपार्थः। तथापि यज्ञस्यापूर्वाव्यभिचारादेवापूर्वार्थत्वनिर्वा
हदुर्बलप्रकरणेन प्रकृताधानसंबंधापूर्वलक्षणानफलेसत्त्वतात्पर्यं इत्यलेति। प्रयाजेऽप्रयाजेत्वप्पलानु
होतीति श्रुतत्वफलेत्यर्थः। पदेति। शंकापदोत्तरमित्यर्थः॥ ॥मिथ्या॥ ॥प्रथमेति अग्निर्वृत्राणि जंघ

वि

श्रा०टी०

नारिति प्रथमायाः त्वं सोमासि सत्पतिः त्वं राजोत वृत्रहेति द्वितीयायाः अवृत्रहनन प्रकाशकत्वादेव
त्वान्नु अग्निः प्रत्नेन जन्मना शुंभान स्तनुवं स्वां कर्णि प्रोणवो हृध इति तृतीयायाः सोमगीर्भिष्ट्वा वयं व
र्द्धयामेति चतुर्थ्याः अवृद्धिप्रकाशकपरत्वाच्चेति भावः व्यवस्थामात्रमिति विधीयत इति शेषः कालस्य
तिन्नस्य प्रयोगादावेव स्मरणं प्रहृत्यकप्रयोगमध्य इति भावः। अमावास्यायामिति वेदिं करोतीति वाक्यशेषः।
13 तत्रामावास्याशब्दस्य प्रधानकर्मपरत्वेपि यथा स प्रमो तथेत्यर्थः। वाक्येनेति। अनेन पूर्वत्र यथावाक्येन प्र
करणबाधस्तथा मिहवाक्येन क्रमबाधस्य प्रसक्तस्य निराकरणात् संगतिरिति सूचितं। सप्रम्पालहाणागी
कारेत्याह न चेह सोमस्येति। नचेति ऐन्द्राग्नादिवदिति शेषः। ऐन्द्राग्नइष्टामिति बलान्मन्त्रलिंगबाध इह तु वाक्यात्स
वायुक्त इति भावः। लक्षणोत्तिलक्षणाया अस्य समभिव्याहारमूलकत्वेन लक्षणागम्योर्थो वाक्येलभ्य इति
भावः। मंत्ररूपमिति। प्रोक्तार्थत्वेन तद्देवं मंत्रलिंगमित्यर्थः। अपेक्षितमिति। प्रधानेतु मंत्रांतरसत्त्वान्न मंत्रा
पेक्षेति भावः। अल्पमिति। अंसंतानप्रामन्त्रापरणापेक्षया प्राप्रव्यावस्थायाः लघुत्वादिति भावः। पौर्णमासी श्रीएम:
ति पौर्णमास्यारम्भकर्माण्ययोरित्यर्थः। एवमग्रेपि पौर्णमास्यादिपदस्य कर्मवाचित्वेन भक्षपसोक्तो भक्षप १३

गमंस्यजतियद्धेति तद्धारेति। तत्काले याज्यभागेनेतपूर्णे इत्यनेन प्रकारेणेत्यर्थः। वस्तुतस्तु अत्र व्यवस्था
यां प्राप्तायां व्यवस्थाविधानैर्व्यासाचाज्यभागद्वारा प्राप्नोतिसाक्षात्तत्काले ह्योनक्रमवस्थाविधानेप्याज्य
भागयोः पर्यवस्यति। एवं वचनविशिष्टोद्देशाद्दोषोपि स्वत्वेमित्यो मुक्तेनानुगलम्भे नामनुवाकानां प्रयोजनसं ना३
बंधाभावात्प्रधानेनासंबंधः। आनेति। उलपेति। ऊर्ध्वं स्तरोदीर्घं वेदिस्तरणमुलपराजिस्तरणं अत्र दीक्षितायम
ति दीक्षितस्यावेदनं किमनेनतरणे इति दीक्षितावेदनस्याध्वर्युकर्तृकस्यापि दीक्षितसंस्काररूपत्वाद्यजमानकर्तृ
कसुष्ठीकरणादेर्दीक्षितावेदनेनांगत्वं संभवतीतिभावः। सर्वेति। मुष्टिवाग्विसर्गप्राक्तनेन सर्वेकमेतत्यर्थः। आनं
तर्यादिति सर्वत्र क्रमादाज्यभागार्थत्वमंत्राणामुक्तेइहक्रमोयोघत इति संगतिस्तत्रचितना एकवाक्यत्वाद्धि
तियेन कर्मणेर्ष्ठेदितिवृहदाकांक्षा पाद्रूकपक्षद्वाद्यभावेपि उलपराजिस्तरणादेरितिकर्तव्यताकांक्षायाः स्वतः स
त्वाद्दारुव्यातन्हेयस्याप्येकवाक्यतासंभवतीतिभावः। अवांतरेत्यापातितः संदेशाभावे ऽवांतरप्रकरणाभावस्यो
क्तत्वात्प्रकरणाभ्यामितिसाक्षात्प्रधानार्थत्वासंभवाद्गावनारिणा पूर्वोक्तसर्वांगार्थत्वमित्यर्थः। नचे
ति। उलपराजिस्तरणादेरिति। कर्तव्यताकांक्षाचवाचनिकांगाहि प्रार्येतिभावः। प्रयोजनेस्वकाले दैवाद्

शा॰ टी॰

14

स्तावनेन नाघहत्वात् कतिपयपाथोनानुष्ठानानंतरं तत्स्मरणे यत्र स्मरणं तदुत्तरेषामसैगुण्यायतत्र कर्मस्वंश
वेष हेतौसिद्धांते त्वनंतरस्यदार्थस्यानुष्ठितत्वाद्धस्तावनेजनाद्येकरणत्राश्चित्तमात्रं सत्रेश्चेचोदनात्र प्रमा
णं। शेषा। अघाससंयोगं कथं स्वात्प्रसंगागतं समाप्यहानीसमसंयोगएव किमेकदेशोनउत्त समस्तेनेतिचिंत्य
तेऽइति संगतिः। कर्मयोगीचतुर्थोकरणरूपकायोन्वयोऽग्नियशब्दस्य देवतानतद्धितेनस्यापित्र हूतेनाग्नि
३५ संबंधमापरत्वंतावतापिद्रव्योपलक्षणत्वसिद्धेरित्यर्कादेवतापरत्वेप्यग्नीषोमीयादिसाधारणमाहाय
वेतिप्रथमपक्षंनिराचष्टे देवतान्यतस्तावदिति। यत्राग्निरुपलक्षणं किंतु तद्धितार्थग्रहणेनाग्निसंबंधमा
परत्वं तावतापिद्रव्योपलक्षणात्वसिद्धेरित्यर्कादेवतापरत्वेप्यग्नीषोमीयादिसाधारणमाहायवेति प्रथमप
क्षंनिराचष्टे देवतान्यतस्तावदिति। नयत्राग्निरुपलक्षणं किंतु तद्धितार्थग्रोषान्यदग्निदैवत्यत्वं उपलक्ष
णत्वेपिश्रुतेनदेवतात्वेनेवोपलक्षणं नाश्रुतेसंबंधमात्रेणेति भावः। द्वितीयपक्षं निराह। अग्नीषोमीय श्रीराम:
होविति। सापेक्षत्वे परस्परसाहित्यात्। तृतीयमनूद्य निराह। यद्यपीति। लक्षणार्थत्वात्। अन्योपलक्षणार्थ २८
त्वात्। सत्रेऽन्योपलक्षकत्वयोग्यत्वाक्षतानाग्निसफलकः शेषः। अग्नीषोमीयादिसाधारणः। तृतीयेनउपल

करोति २

त्त्रणां अंगशेषाणां च परस्परमसंबंधात् ॥ ॥ इति श्रीमच्चंपकनामकृतौ शास्त्रदीपिकाप्रकाशे तृतीय
ध्यायस्य प्रथमः पादः ॥ ॥ श्रीः ॥ ॥ अथ मिक्रमणादेरंगानरप्रकरणादिनांगत्वस्यापि पूर्वपादे विचारि
तत्वात् प्राधान्येन स्रुक्स्रुवइत्युत्तरत्रापि योजनं तेनैवाहोस्वित् विनियोगविचारेपिन कृतिः प्रबलश्रुत्य
त.२.८ नंतदेवे पुनश्चयान्दुर्बललिंगविनियोगविचारस्यावसरादानंतर्येन तु लिंगस्य विनियोजकत्वे कसिद्धं येनात्र न हि
शेषुधितेत्यत्राह विनियोजकत्वमिति। उपक्रवतीति। मंत्रा इति शेषः। सामर्थ्यमर्थाति। शब्दगतमर्थगतं चेति सा
मर्थ्यं हि द्विविधं तत्रार्थगतस्य विनियोजकत्वं न्यायोहाकल्पनेत्यधिकरणे स्फुवेणावघतीत्यादावुदाहृतम्हार्दि
तं। शब्दगतस्येह प्रदर्श्यते। मुख्यार्थस्यवधानं कुर्वन्विछ्वात्तः येयोनि। वेशेषिकादय इत्यर्थः। उपयामितिकु न.५
शादिसुख्यार्थीनामुल्वणादि गोणार्थानां चेत्यपेः। साक्षादभिधानस्य शक्तिपर्यायमुख्यसामर्थ्यस्यापीत्यर्थः।
प्रमाणान्तरादिति मुख्यमानेयानहपदसमभिव्याहाररूपाचानिके विनियोगादिलक्षणाप्यादेत्यर्थः। ननु तात्पर्यबला
त.म.२ देवसामर्थ्येन प्रयोभविष्यतितत्राह तात्पर्ये चेति। न संभवतीति कर्मान्तरेष्वसमवेतार्थत्वादिनेति भावः। ननु मंत्रस्य
नेशाकांक्षोपिगोणार्थस्यस्मारकोयेन यामंत्रस्याकांक्षामुत्थाप्य तत्र विनियोगः कल्प्येत तत्राह अर्थापीति।

३०

शा॰टी॰ योजनं मन्त्रांगोऽपि विनियोगे ऽकृतो नो मन्त्रांगोऽर्थस्य वेदकत्वे देवतादिप्रकाशनसंभवात् इहापि सिद्धि
सिद्धौ तन्मुख्यत्वापायादसिद्धिः। स चेद्यत्नः कारणं तदर्थाभिधानलक्षणाद्वा रसयोगान्मन्त्रेषु क्रतुशेषत्वं स्यात् न स्मा(द्)
६२ संनिसंयोगश्रोत्ससंनिकेन मुख्यार्थेन तु संयोगं स्यात् येन नित्यसंयोगात्। वचना। अग्नौ चयनप्रकरणेन तु
त्या गार्हपत्यप्रकाशनेन विनियोगात् गौणार्थप्रकाशनमित्सत आह विनियोज्यत्वेति इन्द्राभिधानस्यैन्द्राभिधायक
स्य विनियोगे ति विनियोगरूपस्यार्थस्य वर्तिनेत्यर्थः। गार्हपत्येन गार्हपत्यस्य शब्दस्यैन्द्रे मुख्यत्वेऽपि संभवतीत्याह।
15 यदेतियतो गृहपतेः संबंधीत्येन अवयवयोगात् स्येदमित्यर्थे विहितस्य स्त्रत्रयहले कृतागत्य प्रत्ययान्त गार्हपत्य
शब्दाभिधेयं इन्द्रं इत्यर्थः। गार्हपत्यशब्दस्य रूढार्थत्वं कोशेनोपपन्नं तस्मात् द्वितीयावेति। गार्हपत्य इति। सामी
प्यं माधारत्वं बोधयन् कृतेः प्रत्ययस्य च मुख्यत्वाश्रयणेनाह यदूर्मि। आत्मनेपदेति उपान्मन्त्रकरण इत्यात्म
नेपद विधानात्समीपस्थानस्य च स्वतो मन्त्रकरणकत्वासंभवान्मन्त्रकरणकाभिधानार्थत्वेन तेहाभ्यमि
ति आत्मनेपदावगतं यत्समीपस्थानस्य मन्त्रकरणकत्वं तन्निर्वाहायाभिधानमनुमीयत इत्यर्थः। विशेषणात श्री रामः
मभिनयति। गार्हपत्यमिति। गार्हपत्यमुपेत्य समीपस्थित्वाभिदधीतेति प्रास्य गकं समीपस्थानमिहोपस्थानं १५

नः समीपे स्थानस्य ण्यकर्मकत्वेऽपि तद्गम्यमानप्राप्तेः सकर्मकत्वात्तेन कर्मतया गार्हपत्यस्य विशेषणात्त्वमित्य
र्थः । अग्नेर्गार्हपत्यस्य यदुक्तं नाशक्योऽर्थो विनियोग इति तत्राह नचेति । पूर्वाधिकरणवैषम्यमाह यत्रेति । ननु
गोणत्वमेव दोषस्तत्राहावप्रमितिप्राप्तेरिति । प्राप्तार्थस्य यथाप्राप्ति वरणीयत्वादिति भावः । अप्राप्तेति ।
विधेरप्राप्तार्थत्वान्न स्वरसतः प्राप्ततमनीत एवार्थ इत्यर्थः । अनेन गार्हपत्यस्य शब्दसंदृष्टे गोणत्वं ठितीयाः सम
म्यर्थलक्षणा च दूषिता । अवशिष्टं पूर्वहृदयं क्रमेण हृदययति नचेति । नान्यार्थेति । समीपस्थानस्य साक्षादन
न्वयात्प्राप्तिहारादन्वयस्य क्लिष्टत्वाच्चेति भावः । सत्येव वचनवलादिष्टमिगयथाश्रुतार्थः स्यात् । तथा गो
णादिति । हविष्करणोक्तेन्द्रनतोयांपत्नीमुखस्य हविष्कृत्स्वसाधनत्वमाश्रयणावघाते गोणत्वादिति भावः ।
अवघातोद्देशेन मन्त्रविधौ त्रिरस्यस्य किमनुवादकत्वेनान्वयः त विधायकत्वेन नाद्य इति शङ्कते त्रिरिति ॥ उ४
प्रापकाभावादिति भावः । द्वितीयमुत्थापयति विधिरिति चेदिति परिहरति पादेति । नन्वेवमध्वर्योः पत्न्याश्च यक
त्वाभावादवघातनस्यावघातस्याङ्गानकर्मत्वासंभवेन तदाहायकत्वस्याप्यभावादाहृयतीत्यत्र पद्मन्नमनेत्राह
दृष्टतिशिवियोवक्तृगत्याकृष्यते सोप्येहीति शहृसञ्चारयेत्र पमध्वर्योरवघातार्थमन्त्रं प्रयुञ्जानस्तस्येते
ति

वैषम्यापत्तिरिति भावः। आह्वानमनूद्यते। एहीति मंत्रवर्णप्राप्तत्वादिति भावः। एवं प्राप्तिसत्त्वाद्विध्यन्वयित्वाभावात्समाप्तिर्न
विधानलक्षणा। विध्यन्वयिपदे व्यवहितेऽपि लक्षणा तु स्यादित्याशंक्य लक्षणहेत्वोः क्रियाया इति ×२

शा.टी. मेहीति शब्दमुच्चारयति। तत्सामर्थ्याह्वाणोयमाहूयति शब्द इत्यर्थः। आह्वानवाक्यगतस्याप्याह्वयतेर्गौणत्वेऽपि
मंत्रगतेहीतिशब्दप्रयोगमात्रलभ्यस्याह्वानस्य विधेयत्वाभावान्न विध्यन्वितपदलक्षणारूपो दोषः। सि
16 द्धान्ते त्ववधानकालस्यापि विधेयत्वाद्विधेयसमर्पकपदलक्षणा दोष इति क्रियान्तरलक्षकक्रियाकर्त्तरि
विहितशतृप्रत्ययेन क्रियान्तरलक्षणार्थत्वावगमेनान्योपसर्जनतया स्वार्थसमर्थके वद्यन्निति पद एव प्रय
मपि लक्षणौचित्यादिति भावः। वाक्यभेदः प्रागुक्तः। मंत्रलिंगविरोधमुपपादयति। नत्वस्त्विति। तत्रैवात्राह्वा स्व
नेऽत्राह्वानार्थमंत्रोऽपि एहीत्ययथार्थः स्यात्। तयोः पृथक्त्वादिति। किमनयोर्मंत्रयोर्यथाक्रमं गोरोत्थाने वा
ग्विसर्जने च विनियोगः किं वा सुरक्षेत्राग्निविहरणाबर्हिस्तरणापुरोडाशाभिघारणप्रेषणे। व्रतकरणाप्रेष
णे चाविनियोगः उत्थानवाग्विसर्जनाभ्यां तु मंत्रयोः कालार्थः संयोग इति संशयः। उत्थाने वाग्विसर्जने च
मंत्रयोर्वचनेन प्रवृत्तेराधिकरणन्यायेन विनियोगः। एवं च बहिष्पवमानगतस्याध्वर्योरुत्थानं अग्नीधनेऽ
ग्निविहरणादौ च साधनत्वात् गौण्याह्वानस्यात्र अग्नीध्रेन अग्नीन्विहरेति चाभिधीयते। न चाहुविहिंसायामिति श्रीरामः
धानाभिव्रणस्यापि हिंसात्वाश्रयणात् व्रतपयोभवाग्वादिकरणतभन्न्यते तेऽवं विसर्जनकर्मभूतवागेवकर्त्र ३३

त्वोपचाराद्भिधीयते। तात्स्थ्यादिस्थानभेदाच्च वऊवच्चनोपपत्तिरिति पूर्वपक्षः ऐन्द्रीवदिह गोण्योर्थविनियो
जैकवाक्यभावात् समभिव्याहारावगतसंबंधस्य कालार्थत्वेनाप्युपपत्तेः लिङ्गेन मुख्यएव विनियोग इति सि
द्धान्तरहस्यार्थः। अयमत्रार्थत्वाय विशेषाशंकामाह वाक्य इति। नास्तीति मन्त्रमात्रविधानादिति भावः। समभिव्या
हारमात्रान्नलिङ्गं वाक्यमिति पूरिह रतिश्रुतीति। कालार्थः कालस्मारक इति यावत्। उत्थानस्यवि [redacted] धिपाठक्र
मेणावगतमंत्रस्य च मन्त्रपाठक्रमेणानिर्णीतकालत्वाद् उत्थानकाले अग्नीदिति मन्त्रः प्रयोजनः व्रतेनरुणुनेति मन्त्र
कालेचवाग्विसर्जनं कार्यमिति कालार्थः संयोगः। विशेषाशंकान्तरमाह। कालश्चेति तथा च विधेयस्य मन्त्रैकदेश
वेनलक्षणायुक्तेति शंकार्थः उत्तरं तु मन्त्रलिङ्गविरोधादगत्या विधौलक्षणा ऐन्द्री स्थले तु लिङ्गात् श्रुतिबेनव
तीइह तु वाक्यो दुर्बलमिति वैषम्यमिति। सूत्रे उत्थानविसर्जने अग्न्याधानवत् मन्त्रप्रकाशे॥ ॥सूत्रम्॥ ॥दृष्टो
न संगतिः कृतार्थत्वात् न च स्कलार्थत्वेन कृतार्थत्वादित्यर्थः। दृष्टेति। आग्नेयादिपाठे दृष्टोग्न्यादिदेवता
भिधाने नेत्यर्थः॥ निर्णीतेति। उत्थानविसर्जने अप्रन्त्रेपाजयाज्यानेन रतस्य पाठादिति भावः। प्रस्तरप्रह
णात्वबर्हिर्विप्रस्तरसाहनानंतरं विहितं च वनदोप्रहरणं संभवति स्त्रुग्धारणादिकार्यानिष्पत्तेरिति नदर्नित्तानिका

शा॰ टी॰ 17

त्वमिति भावः। उत्तनीयेति। इत्थंभूतलक्षणा इति सत्येव किंचित्प्रकारविशिष्टस्य पत्न्याः ज्ञापकत्वं तत्र उत्तनीयावि
धानात् सूक्तवाकस्य च अङ्गिमभागावस्थ प्रस्तरज्ञापकत्वात् उत्तनीयोपपत्तिः। सूक्तवाकस्य तत्ज्ञापकत्वं च
सूक्तवाकप्रयोगकाले प्रस्तरहरणं संनिभवतीति न सूक्तवाककाले प्रस्तरं प्रहरेदिति कालार्थः संयोग इ
त्यर्थः। नन्वियेकरणात् उत्तनीया स्यान्नेत्याह नहीति। कथंचिदपि संभवतीत्यन्वयः। प्रहरणस्य यागरूपत्वाभा
वादिति भावः। अनुत्पन्नास्तनाविशेषात् उक्तनित्यकिमिति। उत्तरमाह सर्वे इति क्रियायोग भः। क्रियाप्रयुक्त इति याव
त् यथा राज्ञः पुरुष इति राजपुरुषयोः स्वस्वामिसंबंधः एकस्या दानक्रियायां उभयोरन्वयात् इति ग्रहीतृभावात् यां क्रियायां
प्रयुज्यते तद्वत् प्रकृते सूक्तवाकप्रस्तरप्रहरणयोः लिंगलिंगिभावः संबंधः लक्षणा क्रियाप्रयुक्तो वाक्यमित्यर्थः।
लक्षणा क्रियायामज्ञाने क्रिया न ततः किं तत्राह नचेति ज्ञापकस्य कथंचित् उपप्राप्तमागमस्य विप्रकृष्यतेऽविलंबेन प्र
तीयते नान्युपेक्ष्यते क्रियायाः शाब्दोपात्तत्वात् क्रियान्तरस्य चानपेक्षत्वात् शीघ्रं प्रती[illegible]तिः करत्युपर्यः। अतो
ति[illegible] मंत्रस्य प्रहरणांगत्वं [illegible] प्रकाशयद्देवतान्वयादेव[illegible] देवतालाभात् प्रहरणस्य होमत्वं कल्प्यते च प्रसे
परूपत्वात्। स्वहोमः स्वांग सूक्तवाकेन प्रकृतानग्न्यादिदेवताप्रकाशनात् संस्काररूपो न स्वतंत्र इत्यर्थः। प्र

श्री राम॰ ६

योजनं पूर्वपक्षे प्रहरणस्य होमत्वाभावान्नोहेशात्साङ्गेऽसिद्धान्ते तु होम इति। मन्त्रे सूक्तवाकेन प्रस्तरमितिवा
क्ये॥ ॥ कण्डिका॥ ॥ कालार्थसंयोगे विभज्य विनियोगस्याशङ्कां गिलमुपजीव्यास्य विचारस्य पूर्वत्वेनो
रित्याश्र पत्वात्संगति [redacted] श्रयेनाह। प्रहरणेति। कन्दः। इदं द्यावापृथिवी इत्यादिनेमो देवेभ्यः संतः। इष्टेति। योगास्या सं
ता इष्टदेवतापृष्ट्युक्ततयामावास्यायां तदिष्टदेवतापृष्ट्युक्ततयेत्यर्थः। प्रसिद्धेरिति। तथाचाविभज्य विनियोगे कृ
कप त्स्नरूढस्य सूक्तं गां भाव स्यन्तरे के [illegible] लक्षणास्यादिति भावः। नन्वेकैकस्य प्रकरणाभावात्समुदितागत्वे विभ
ज्य इह विनियोगः स्यात्तत्राह। अग्नेर्यूपाहोना मिति तदर्हे अतिप्रधानसाहृत्यिस्यात्तत्राह। सातेति। एककालत्वे प्रस्तरै
न्ऽ प्रहरणे सूक्तवाकोऽपि मन्त्रेणोपकरोतीत्यर्थः। कालभेदे तु प्रहरणादूर्ध्वं आहृतिमाह सम्पुहायेति। प्रहरणा
गस्य कथमुक्तार्थेतेत्यत आह। प्रहरणमपीति प्रहरणस्य स्वाङ्गमन्त्रद्वारा इष्टदेवतासंस्कारार्थत्वस्य परवी
धिकरणे उक्तत्वात्तन्मन्त्रस्यतदर्थत्वमित्यर्थः। ततः किं तदाह। मन्त्रेति। लैङ्गिके प्रयोगवचनविरोधेनाहरणीयमि
त्वामिर त्यस्याह नैवमिति। दृष्टप्रयोजने सम्भवति नादृष्टप्रयोजनकल्पनन्याय्यमिति सिद्धान्तयतीति विभज्येति। अवय
वेति। अवयवद्वयस्यैव प्रयोगसम्भवे रूढिर्नैकल्प्यात्रापेक्षत्वप्रसिद्धिरपि त्र्यध्ययनकाले प्रयोगभेदानाकलन

शा. टी. प्रयुक्तनयान्यथासिद्धेतिनन्ततोपि न्यूहिसिद्धिरितिभावः। सूक्तमितिसुष्टुं ऊमाज्यभागाहिषुनिर्दिष्टमग्न्या ३१

हिकंवक्तीत्यर्थः। सत्रैकृत्स्नस्यैवनिगदस्यसूक्तवाकशब्देननिर्देशात्॥ ॥लिंगा॥ ॥[redacted]दिलिंगादिंद्रा इंद्र था २

ग्न्यादिविद्रास्तदेवता काइतियावत्। यत्रनैकाम्येष्टितदितरसाधारणपेनइंद्राग्न्यादिदेवताककर्ममात्रइत्य

र्थः। श्रुत्याहिवाक्यादिश्रुत्यादिकंयथासमान्यसंबंधवोधनेनपरविशेषबोधनेचव्याप्रियतेनतथालिंगमपिव्या

पारेतुंसमर्थमुतलिंगंद्वारविशेषमात्रबोधकंक्रतुसंबंधायतुप्रमाणांतरापेक्षमितितदर्थसंशयस्यार्थः लिं

धे ६ गस्यनैरपेक्ष्यान्न क्रमायत्तरो[illegible]नसंकोचइत्याशयेनाहतहलोयइतिलिंगस्येवाविनियोजकत्वमुपपादन

श्लोकंव्याचष्टेस्वाध्यायेतिसत्यमितिअध्ययनविधितः प्रयोजनंसामान्यतोव[illegible]गतंनतुविशेषतः नचलिंग

मात्रात्तत्सिद्धिः ततः प्रमाणांतरापेक्षास्तीत्यर्थः। अग्न्यादीति। इंद्राग्न्यादिस्वरूपमात्रप्रकाशनसामर्थ्यरूपा

ल्लिंगात्कल्प्यमानाश्रुतिरनेनमंत्रेणअग्न्यादिप्रकाशंकुर्यादित्येवंकल्पयितुंशक्रोतनतुक्रत्वर्थवेसाधनंप्र

काशयेदित्यपि। अस्यवैशेमंत्रस्यासामर्थ्येनतत्कल्प्यश्रुतेरपूर्वसाधनप्रकाशनविषयत्वासंभवात्। प्रमाणां २८

तरेणतुकर्मसंबंधेसिद्धेसकिंद्वारेत्यपेक्षायांद्वारविशेषमात्रेलिंगस्यविनियोजकत्वात्कर्मसंबंधिप्रकाश

नस्य च मंत्रक्रमसंबंधानिर्वाहकत्वे नहारत्वासंभवात् क्रत्वर्थसंबंधिप्रकाशनस्यैव द्वारत्वात् तद्विषयैव श्रुति
र्लिंगात्कल्प्येति सिद्धसमवेतार्थप्रकाशनार्थत्वं लिंगस्येत्यर्थः। ननु दर्शपूर्णमासप्रकरणाम्नातस्य पूषा
प्रपिष्टभागइति पूर्वार्धस्य प्रकृते पूषाभावादुक्तरूपस्य पूषप्रकाशनस्य संबंधकोऽभावात् तदभावेऽपि पूषसंबंधित्व
मात्राद्देवतात्वसंबंधोऽस्तु तथाहि ऐन्द्राग्नस्य विनियोगमात्राद्देवतात्वेन देवताकर्मणि विनियोगः। किं न स्यात्तत्राह श्रूय
ते। मुख्यार्थासंभवात् यागलिंगविषयपात्रहि। अयमेते भागशब्दो पूपमित्सन्निमयादंते वाक्यादेवतात्वसं बं
धं वक्ष्यामइत्यर्थः। स्कवाहि वदितिपक्षरवाहिरः स्तुवाभवतीत्यनारभ्याधीतेत्यादि। आत्मज्ञानस्य देहादि
व्यतिरिक्तात्मज्ञानस्य सांपरायिकेतिपारलौकिके त्यर्थः। क्रममात्रार्थस्याग्नेयेष्टिक्रमेऽस्राम्नातानां मंत्राणां त
दिष्टान्वयमात्रेणाक्रमस्योपपत्त्यात द्विष्टोप्रथमातिक्रमेकारणाभावात् सामिधेनीष्वेवान्वयः स्यात् समारूया
मात्राद्दैष्टसमानदेवताकानानेष्टिपु मंत्राम्नानान्तत्र युक्तक्रमेणाप्यन्वयः स्यात्। तदुभयवारणायोभयार
क्र२ द्द्वित्याशयेनाह। क्रमसमारख्येति असंभवतामिति। असंभवश्च क्वचित्प्रधानेदेवताप्रकाशत्वाभावात् पूष्णा
सोमारौद्रेष्टिक्रमेऽम्नातानां मानवीनां ऋचां तत्प्रकाशकत्वेऽपि बहुत्वात् क्वचिदसंभवः। यथाऽग्नेयेर

३ x यविशेषसंबंधरहिताशत्यर्थः॰ वाक्यांतरेणेत्यनंतरं विशेषरूपेणैवेत्यनुषंजनीयं॰ पूर्वपक्षवक्ष्यमाणासन्निधानार्थं प्रदेशांतरस्थ॰

ग्रा॰ टी॰ होमे पुरोडाशमष्टाकपालं विधिविहितस्तेन दिष्टिक्रमे आम्नातानां करणे एषां याज इत्यादीनामिति बोध्यः। आदि
19 शब्देन आज्यभागस्विष्टकृत्संयूहः सत्रेतत्रादिष्टलिंगानुसारि क्रमात्समाख्यानाच्च काम्येष्टिगतं इत्याग्नी
खायां वेति न नियमः। सांनाय्यदोहानंतरं शाखानाशः प्रातर्दोहार्थं न शाखांतरे संपाद्येति अन्तेतदुभयविपर्ययः। प्र
त्रे दोहयोः कालभेदात्सायंदोहस्यैव स्थानं। न प्रातर्दोहस्येति न प्रतेपयः धर्मैरसंपृक्तं॥ ॥तद्व॥ ॥उपोत्रेउ
परवषांस्त्रपंवायकृतस्थंडिलेरवरात्मदृत्यर्थः। इहेति ऐंद्रवायवादिग्रहयज्यभ्यासानां तत्रानुष्ठानादित्यर्थः। प्रक
रणादिति। प्रातः सवनिकग्रहयज्यभ्यासमात्रस्य प्रातिस्विकविध्यभावात्फलवत्त्वाभावेच्च तन्मात्रस्यप्रथ्यागिति
कर्तव्यताकांक्षाविरहान्महाप्रकरणान्नसंबंधोपादित्यर्थः। सत्रेमाध्यंदिनादिसवने आग्नेयग्रहजातमपि प्रातवत् श्रीराम:
धर्मपृक्तं स्यात्॥ पूर्वो॥ ॥परिव्याणांतरमिति आश्विनग्रहोत्तरकालस्य आश्विनं ग्रहं गृहीत्वा त्रिवृतापूर्णमिति ५८

इवांतरप्रकरणाभावात् २०

वाक्यादेव प्राप्ते रूपनिष्क्रमणस्यापीतत्प्राप्तेश्चात्र परिमाणमेव विधेयं तत्र पुनः अकृतेः कर्मान्तरमित्यर्थः अक्र
माद्दिति। पूर्ववत्तक्रमबाधकस्य प्रकरणस्याभावादित्यर्थः। अत एव सङ्गतिः। एवमप्यग्नीषोमीयार्थेपि पार्थत्वे
न परिव्याणां न विशेषणीयं किं त्वग्नीषोमीयसंबंधित्वयूपसंबंधित्वमात्रेण तत एव धर्मो न यूपक्रमपरिहार इहाग्नी
षोमीयसंनिधेरप्यकूपप्राप्तेश्च अन्यथा सर्वसाधारण्येन त्रवृत्तेर्मानाभावाधर्मे अकृतेः संकोचापत्तेरित्याशयेनाह अक्र
मेणेति। नन्वेवमपि सवनीयपरिव्याणस्य तद्यूपसंबंधिनाग्नीषोमीययूपसंबंधित्वाभावात्तन्न साधारण्यं तत्राह।
सवनीयेति। एकादशिन्यूपस्य सौमिकपशुत्वे तेन तापावत्समाणत्वात्सवनीयपरिव्याणमप्यग्नीषोमीयसंबं
धियूपसंगतमित्यर्थः। सूत्रे सधर्मो शास्त्रेनापरिमाणाद्यस्यापि साधारणी त्रिवृत्ता पूर्वपक्षीय आग्नेयं सवनीये प
शुमुपाकरोतीति सवनीयोत्सर्गविवाक्ये त्रिवृत्त्वधर्मप्रकरणानानुवादरूपलिङ्गदर्शनात्॥ ॥आर॥ ॥वाक
प्रकरणविरोधाविरोधचिन्तायाः स्यान्तस्य पूर्वैः सह विरोधाविरोधप्रसङ्गो वा संगतिमाशङ्क्याह। अतः परमिति।
समाख्यानविधानप्रसंगागतेत्यर्थः। प्रकरणमत्र क्रिमारम्याधीतग्रहमात्रानुगतं किं वा सौमिकं महाप्रकरणमा
ग्रहग्राह्यहाराणामिति तेषां फलार्थतया विधानाभावादिति भावः। द्वितीयमाहनायीति। येसोमप्रकरणगताः ग्रहा

शास्त्र:

55

स्तान्न संभ्रमज्यादित्येवं रूपेणाप्रकरणस्य धर्मविधिषु विशेषणत्वं न संभवति विनियोगमात्रप्रमाणस्य तस्य प
रविशेषकत्वानुपपत्तेरित्यर्थः। अ इत्यमेवान्तरा इति तासर्वं संक्षेपतः आह न हीति। तेन प्रकृते न विशेषणादि
ति। धर्मविधिषु इदं प्रयग्रहणाशास्त्रार्थस्य प्रकरणानापेक्षसाधनत्वरूपविशेषणान्मादिति यावत् फलितमाह
ये चेति स्तत्र आगद्भे शिष्टेऽनारभ्याधीतमिति यावत् तेन दंष्ट्राभ्यां ग्रहद्वयं धर्मैरसंबध्यते तेषां सन्निधानादार
अन्यं ५ भ्याधीतग्रहैरेव संबध्यते॥ ॥अनारभ्येति॥ यांकांचन ब्राह्मणो वती मिष्टकामभिजानीयात् तामध्यमायां वि
धान तावुपदध्यादिति वाक्येनेत्यर्थः। स्तत्रे आप्रकरणे पदानां गविशिष्टत्वादिकं न तदपि आश्वदाभ्यग्रहवत् धर्मसंबद्धस्या
त्॥ ॥नेति॥ ॥मन्त्रमात्रविकारत्वे संस्काराणामसत्त्वाद्विचारो पोगाग्रहस्येति अपूर्वं वामित्रे नयपात्रपूर्वं सा
धनत्वाविशेषादनारभ्याधीनानां सामान्यविध्यंत याक्यत्वमस्यायीति संगतिः स्वचितोउच्यत इति यद्यपि संस्का
रवाक्ये साधने नैव संस्कारसंगतिः तथापि साधनेनापि नित्यतया स्वरूपेणासामेनैव तत्संगतिः। न त्वनित्यतया वि श्रीराम:
रूपेण फलचमसेनापि नित्याविसंयोगविरोधादित्यर्थः। तदनुरूपमेवेति अन्यथा नित्यत्वव्याघातादिति भावः। द
ष्टांतेन विघटयतीति ब्रीहिवदिति यथा ब्रीहीणां शास्त्रीप्रयोगमात्रे प्राप्तिः शास्त्रप्रयोगविशेषाग्रहणात्तु एवं यवा

५५

नामपीति आम्नातरूपेणाधर्मे विधिस्यरूप्यात्फलं सामान्यविध्यमित्यर्थः । नन्वेवमप्येकस्मिन्नप्रयोगे उभया
ननुष्ठानात्तत्रास्तु नित्यत्वमित्याशंक्यानुष्ठानप्रयुक्तो नित्यत्वेन द्वारत्वविरोधी त्याज्य इत्याह यद्यपीति । आम्ना
नकृतं नित्यत्वमेव द्वारत्वे प्रयोजकं नानुष्ठानकृतमित्यत्र विनिगमनार्थमाह शाद्वेति । नित्यत्वं हि धर्मे विधेयकाम्य
त्वापयोगित्वेन धर्मद्वारत्वे प्रयोजकं एकत्वात्तस्य तत्र चाम्नानकृतनित्यत्वमेवोपयोगि शाद्वेनित्यधर्मान्वयेशाद्वनित्य
त्वस्यैवोपयोगात्तत्रानुष्ठानकृतमपि तस्य शाद्वसंस्पर्शित्वादित्यर्थः । नित्यानित्यसंयोगविरोधस्यैकत्वाभिमतावि
घटकत्वमेव एवमनयोः सतोरनिराकरणेन विशदयितुमिव घमिश्चुतनेति प्रयोगनिष्ठेति इदंच संभवमात्राद्युक्तं इह तद
नुपयोगस्य प्रागुक्तत्वात् ननु राजन्यवैश्ययोस्सोमाभावात्कथं तस्य नित्यत्वं तत्राह राजन्यस्येति पर्युदस्तविशेषमेवो
पपादयति तत्त्वेति नैमित्तिकस्य चितिकर्मकेन सोमफलचमसाभ्यासयोः प्रकृतिविकारभावाभावेपि फलचमसे
तत्कार्यापन्ने अतिदेशः संभवतीति भावः प्रयोजनं पूर्वपक्षे फलचमसे गुणकामानां प्रवृत्तिः तथाव्रीहीणामे
वेत्यस्य यवाधिवत्सोमेनेष्टानि मीमांसाहोर्नेष्टेन्नि स्वसिद्धान्ते गुणकामानां प्रवृत्तिः सोमेनेत्यादेस्तूहेन प्रवृत्ति
स्वसत्वेऽप्यतुल्यत्वात्तन्नित्यधर्मसारूप्याभावात् । प्रति । प्रयोजनं व्रीहीणां मेधेत्यादस्तूहान्नहो ॥ नियं । प्रयोज

श्रा.टी.

56

मं सोमं नैकीरणमीत्याहुः पूर्वैविद्भ्यन्तरो। संस्थापूर्ववाहिह सामानविध्यमिस्फलानात्संगतिः। ननु संस्थानां
काम्यत्वेनानित्यानां नित्यानानित्यधर्मोऽन्वयाभावस्यानैमित्तिकमतुल्यत्वाद्धि स्यधिकरणे सिद्धत्वात्कृत्वार्थमि
दमित्याशंक्याह नैमित्तिकमित्यादिना। तत्रासिसस्यानित्यधर्मान्वये हारत्वं नेत्येककं इह संस्थानां नद्वारतयाध
र्मान्वयः तासां क्रत्वर्थत्वाभावात्। किंतु स्वयमेव धर्मैयाहित्वं नतु श्वतत्रानित्यस्य स्वयं धर्मग्राहित्वाभावस्याऽ
नुक्तेनैगतार्थतेसर्थः। काम्यगुणमात्रस्योदाहरणत्वे सोत्र संस्थाशब्दविरोधमाशंक्याह संस्थाग्रहणमिति
संस्था स्वपकृत्याद्युदाहरणेन त्वग्निष्टोमसंस्थत्यायेनाह। ज्योतिष्टोमस्येति। अग्निष्टोमस्येति
ननु दशमेऽग्निष्टोमे राजन्यस्य गृहीत्याद्धितिवचनस्यात्यग्निष्टोमसंस्थोपमर्देन षोडशिसंस्थाविधाय
कत्वस्य वक्ष्यमाणत्वात्। षोडशिन्यन्तर्भावोऽनुपपन्नस्तत्रापि षोडश्ययनं नतरं स्तोत्रान्तरसत्वे न तस्य षोडशिसंस्था
नुपपत्तेरिति चेत्तत्सत्वे न यात्प्यग्निष्टोमस्य यत्क्रतुकरणं नद्वात्यग्निष्टोमस्यापि क्रतुकरणाय श्चाग्निष्टोमस्य
सवनीयः क्रतुपशुः स एवात्यग्निष्टोमस्यापीति क्रतुकरणकरणपश्वादिभेदाभावात्तस्य तदन्तर्भावः। तथा वा श्री एप:
जपेयस्य षोडशिवदेव पश्वादिति तस्यापि षोडशिन्यन्तर्भाव इति भावः। संस्थानां च तुष्ट्वस्त इति विरोध इत्यत आ

५५

ह एतदिति नन्विति ग्रहाद्दीनामित्यादि शङ्केन्षोडशिवाक्येऽकृतेः अतिरात्रवाक्ये कृतोऽस्य संग्रहः। न संस्थाया
इति तद्वाचकशब्दाभावादिति भावः। उक्थ्यवाक्ये ग्रहस्य फले विधिर्न संभवति। उक्थ्यशब्दस्य ग्रहपरत्वे लक्षणा
२२ प्रसंगादित्याह। अथ शब्दोऽयमिति संस्थाविधिस्तु संभवतीत्याह। समाप्तेरिति। स्तोत्रसंबंधिन्या इति उक्थ्यस्तोत्रेण
याक्रतोः समाप्तिस्तस्या इत्यर्थः। संस्थेवेति न नहि ग्रहः क्रतुरित्यर्थः। समाप्तावपि समाप्तिप्रयुक्ते क्रतावपीत्यर्थः।
ततश्चोक्तन्यायेन संस्थावाचित्वसिद्धिः। यद्यपि संस्थावाचित्वेऽपि ग्रहविधिशब्दान्यत्वाविवक्षणस्यैव तथा
पि साधाकित्तुल्यबोग हेतमेति नर्तुष्पनीति भावः। उक्थ्यान्तिकामिति उक्थ्यसंस्थ्यायापशुनक यो दित्यपो वाध्यः।
संस्थारूपगुणस्य फलभावनायां श्रयणद्वाऽऽम्नायाकरणत्वेन कर्मत्वायोगादिति वोध्यं उक्थ्यमिति द्वितीयाचापि
होत्रं जुयादितिवत्तृतीयार्थे ग्रहणमित्यस्य स्थूलत माप्लवभेते सत्रस्यालभतिवत्प्रत्ययमात्रानुग्रहाय। नत्वादेकसेनान्वय इत्या
ह ग्रहणमिति वाक्यान्तरेति। ग्रहं वा गृह्णीतेत्यादिवाक्यान्तरेत्यर्थः। एवं षोडशिशब्दस्यापि स्तोत्रवाचकत्वेनतु षोडशिस्तो
त्रेण समाप्यमानक्रतौ षोडशिपदम् इति प्रयोगात्संस्थावाचकत्वमप्यंगीकार्यमित्याह एवमिति। नन्वेवं नर्यत्र स्तोत्रवि
धिरेवं किं न स्यान्नत्वाह क्रत्विति स्त्राश्रयत इति गुणवचनानामाश्रयतोऽलिंगभाक्त्वादिति भावः। सर्वे षोडशिनामयत्त

इतिशाकेप्र्येयः अपंचप्रकारस्त्वेकस्य वाक्येऽपि योज्यः। समर्पीति। अघ्रिरात्रशब्दस्य यौगिकत्वाद्द्रव्यवार्थविशिष्टवाचि
त्वान्नात्राक्रत्वधिकरणन्यायेन संस्थामात्रवाचित्वमिति भावः। आग्रत्वादिति। आग्रयज्ञस्य फलसंस्थोभयसंबं
धविधानेन वाक्यभेदप्रसंगात् तत्माग्रित्य संस्थैव फलाय विधीयत इत्यर्थः। ननु तर्हि केवलसंस्थार्थत्वमेव किं न स्या
त्तथापि वैरूप्याभावेन विनिगमनाविरहादित्यत आह न च क्रतुत्वमिति। अक्रियात्मकत्वात्। क्रियासमाप्तिरूपस्येन क्रि
यात्वाभावादित्यर्थः। क्रियमनादस्य नकेवलसंस्थाभिधर्मोऽर्णामन्वयः क्रियया तु तदन्वये संस्थानपेक्षत्वमिति
वैषम्यं धर्माणां क्रतुसंस्थयोरन्यतरार्थत्वाविनिगमकत्वं नोपपद्यते इह तूभयार्थत्वसंभवात् विचित्रगमकोऽपेक्षेव ना
(दस्य न केवलसं) सीति वैषम्यमकिंचित्करमिति शंकते एवमपीति। वैरूप्यमेवाहांगेतिप्रयोगे ज्ञिएतोदर्शांगक्रतोन
प्रधानेनाप्यर्वक्रुयीद्दिसंब प्रयोगवाक्ये विशेषणभावेन स्वार्थसमर्पका इत्यर्थः। तासूर्पभेदमेव वचनव्यक्तिप्रद
र्शनेन विशदयति यइति। याप्रकृतक्रतूपजीवनमात्रेणधर्मविधीनां प्रथमतः कथंक्रियान्वये व्यापारसिद्धिरत आह अंशे
ति। क्रियाप्रकृत्केशितिकर्तव्यतान्वयानंतरभावितान्यथमंक्रियासंबंधे धर्मविधीनां व्यापारस्यावश्यक इत्यर्थः संस्था
तं विध दोकचित्काम्यगुणसंभाविशेषमाह अयं चेति न संस्थाभिशितिसंस्कारणं संस्था संबंधे ह्याशभावादिति भावः।

श्रीरामः

प्रयोजनं गुणकामप्रवृत्तस्य प्रवृत्तिरूपं ननु नेदं प्रयोजनं विकृतिप्रहित्यया अकृताश्रयाभावाद्गुणकामानाम्
प्रवृत्तिः संस्कारानां तु विकृतित्वेऽपि तदाश्रयभूतज्योतिष्टोमस्य सत्त्वात् न दोषः मेन यागस्तुष्टी य आमानस्य सहोमानादेये
याश्रकृताश्रयस्य सत्त्वेन यदि कामयेन वर्षेक स्यनेन्यस्याद्धिति नैवेरमरोमिनुयाहितादिगुणकामानामिह प्रास्त्व
श्यंभावाद्धिति चेन्नत्वं तथापि संस्कारार्थं यद्वक्ष्यादिपिर्हयोगाभ्यांसांतरं तत्र प्राकृते न धर्मारण्यं मतिदेशतः प्राप्तौ प्र
द्वाधाभ्रितेन गुणकामप्रवृत्तस्य प्रवृत्तिरूपं प्रयोजनं संभवतीति॥ ॥इति श्रीवैयक्तवाथकृतौ शास्त्रदीपिकाव्याख्याने
प्रकाशाख्यानेनं नीयस्य षष्ठः पादः॥ ॥प्रकृ॥ ननु तुल्यः सर्वेषां प्रभुविधिरित्यधिकरणत्यागेन प्रकरणस्य प्र
वैः सह विरोधाविरोधविचारसमाप्तेः तत्र वाक्यप्रकरणाविरोधाविरोधचिंतानं संगतेत्याशंक्य चिंतासंगमयन्नवि
षयसंशयावाहसमाने नेति प्रारोहिष्टमित्यधिकरणेऽन्तः परंपरासंगतिकोक्त्येत्यक्ते तत्र समानविधानत्वसंगाग
तो यो वाक्यप्रकरणाविशेषाविरोधविचारः स एवात्रानुवर्त्यत इति नासंगतिरित्यर्थः। वाक्येति। लवनादीनां बर्हि
रादिस्वरूपार्थत्वोपत्त्यानर्थक्यप्रसंगादित्यर्थः। अवश्यमिति। दोषद्वयपरिहाराय प्रकृतापूर्वसाधनार्थत्वस्य स्वी
कार्यत्वादिति भावः। अवच्छेदकतयेति। साधनेन धर्मान्वये पूर्वव्यावर्त्तकतयोपकुर्वन्ति न तु स्वयं धर्मेयाहकतये

ग्रास्त्र॰ स्यर्थः॥ तस्मादिति प्रधानस्य ग्राहकत्वाभावादित्यर्थः॥ अस्त्वेवाप्रधानस्य ग्राहकत्वं तथापि येष्वाहविरासादनद्वा
राप्रधानापूर्वं कुर्यादिति न वाक्यार्थः प्रधानेत्यतिविधिना धर्मविधीनामनन्वयप्रसक्तेः किंतु प्रयोगविधिनेवान्व
58 यात् प्रयोगविधेश्च सांगप्रधानविषयत्वात् प्रधानापूर्वोपयोगिहविरासादनद्वारा प्रधानस्योपकुर्यादित्येव
वाक्यार्थ इत्यंगप्रधानार्थत्वे नानुपपत्तिरित्याशयेन पक्षांतरमाह॥ अथ चेति॥ तत्रेत्यसंयुक्तमंगार्थेन
प्रधानार्थेन वा विशिष्यासंयुक्तं फलापूर्वोपकारत्वं गतिः। तदर्थमिति यजमानस्यैहिककर्तृत्वं भोक्तृत्वं चास्ति तत्र
किमिमे धर्माः कर्तृत्वे उपकुर्वंते उत भोक्तृत्वे इत्यर्थः। तादर्थ्यं च प्रधानार्थत्वं चेत्यर्थः। संस्काराणामिति शेषः। अदृ
ष्टत्वादिति प्रत्यक्षादिप्रमाणागोचरत्वादित्यर्थः। तत्तस्य विनापि संस्कारैर्भोक्तृत्वं सिध्यतीत्यनवगमात्। तादर्थ्यं ते
षामुक्तमिति भावः। ननु सांगप्रधानजन्यत्वात्फलस्य फलाधारत्वयोग्यतार्थानां संस्काराणां प्रधानार्थत्ववदंगा
र्थत्वमपि स्यादत आह प्रधानफलमिति अंगस्य क्रतूपकारोपक्षीणत्वात् न फलजनकत्वमित्यर्थः। प्रयोजनं पूर्व श्री एप:
से अग्नीषोमीयविकारे निरूढपशुबंधादौ तेषां प्रवृत्तिः सिद्धांते तु नेति। तत्र स्वामिसंयुक्तं वपनपयोव्रतादिकं प्र
धानस्य धर्मः फलभावत्वस्वरूपभोक्तृत्वसंयोगात्॥ ॥विकी॥ ॥फलवत्त्वादिति अनेन पयोव्रतप्रधानमात्रस्य फल ५८

वत्वात्फलत्व सिद्धरूपयोगिनां पयआदीनां प्रधानमात्रार्थत्वं तथात्वात् तत एव हेतोः प्रधानमात्रस्यैव चिकीर्षितत्वात्तत्संयुक्ता
वेहिरपि तन्मात्रार्थेति प्रसव स्थानात्संगतिरिति सूचितं । नांगानीति । अंगानुष्ठाने तु चिकीर्षितप्रधानार्थ
३ ॥ ॥तथा॥ ॥ त्वात् न तु चिकीर्षितत्वादिति भावः ॥ तल्लिप्सयेति प्रस्तुताधिकरणसिद्धांतानंतरमारंभे सिद्धांतसूत्रव्याख्याना
वतुरिति ४ त्संयोगादित्यस्यार्थ तु हविर्हुतेति भावः । पृथिवी होतेत्यादिमंत्रस्य तु हेतोः अग्निर्होतेत्यादिः पंचहोता प्रधानव
चनत्वादिति प्रधानस्य च साक्षादभिमर्शनायोग्यत्वादानर्थक्यतदंगन्यायेन प्रधानार्थहविरभिमर्शनार्थतेति भावः । प
द्वहयेऽपि सोमे वेपनुष्ठाने विशेषाभावात् । प्रयोजनाभावमाशंक्य सिद्धांतप्रयोजनमेहाग्नीषोमीयेति चोदकाद्युपदि
शस्य संकोचानकुशलः किंत्वपदेशबलात् चोदक एव वृद्धिव्यति । के संकोच्य इत्याशयेन परिहरति नैवमिति । आनर्थ
क्यतदंगन्यायेनापि कर्मगतसाध्यत्वान्निरोहाः । नाद्वितीयाच्छलेतन्न्यायप्रवृत्तिरित्याशयेन द्वितीयाधिकरण
सिद्धांतमाह द्वितीयस्येति सर्वोऽपि त्वप्रकृतान्तरमाह हविर्मात्रस्येति अविशेषेण सर्वहविषामभिमर्शनविधानात्तत्र
कस्य प्रधानहविर्मात्रे संकोचायोगात्सर्वार्थत्वमित्यर्थः । इहत्वपूर्वधेयं नात्र वार्त्रघ्नीवाक्य इव संत्रव्यवस्थामात्र
विधिः दर्शपूर्णमासप्रकरणे मंत्रयोरनाम्नातत्वेन तदुदितमंत्रयोः क्रमप्रमाणानश्यास्यभावात् । किंत्वशामंत्र

शा॰टी॰

वृत्तान्त फलसिद्धरूपयोगिनां वयनादीनां प्रधानमात्रार्थत्वं तथा तत एव हेतोः प्रधानमात्रस्यैव चिकीर्षितत्वा
त्तत्संस्कारकत्वे दिशयितन्मात्रार्थेति प्रत्येयस्यानात्मं गमिशिति सूचितं। नंगामीति। अंगानुष्ठानं तु चिकीर्षित
प्रधानाप्यत्वात् न तु चिकीर्षितत्वादिति भावः॥ न हि प्रसक्ते तिष्ठत्स्तनाधिकरणसिद्धान्तानंतरमारंभे सिद्धान्त स
श्रद्धा वधानात्मं योगादित्य स्थानुदृष्टिदुर्लभमितिभावः। दृष्टि वीहोनेत्या × विधिरेवेति। द्वितीयाधिकरणसूत्रेऽ
भिधानशब्दः प्रधानाभिधायकपौर्णमास्यादि। शब्दपरः॥ दीक्षा॥ विनियोगादिति। यो दीक्षितो यदग्नीषोमीयं पशु
मालभेतेति दीक्षितः सोमं क्रीणातीत्यादिवचनादिति भावः॥ पशूपपत्तेरिति। अनेन नयथा च तद्धेत्वादेरंग प्रधानार्थ
त्वेऽपि वचनाद्विशेषः एवमिष्टीयीतिसंगतिः सूचिता। न चेति। अग्नीषोमीयादीनां दीक्षानंतरमाम्नानमत्र क्रमप्रा
प्तानुवादमात्रं योदीक्षितग्रहणमित्याशयः। प्रयोजनं निरूढपश्वादेः प्रकृतस्याप्रवृत्तौ॥ तथा॥ पपस्याद्भिरत्व पर्य
स्कोरणायेश्चपेयश्च यतइत्येपणांगत्वेनेति। प्रयाजमानाधिकरणत्वसम्प्रयोगत्वपर्यवसानादिति भावः। इयतिशब्दा
महइति वचनेन कृत्स्नपानप्राप्तोऽप्यनियमपरिसंख्या स्वीकारे प्राप्तपरिसंख्यात्वात्तत्रैदोषादेवायं पक्षोत्संतेऽह्यषः श्रीरामः
तस्मादहर्दर्शमत्तेर्वेदीस्य स्थनियमविधित्वं सर्वेपक्षिणाम्स्वीकार्यं तथा चाद्धान्तरस्य बहिरेव प्राप्त्यभावादनुवादोऽसंभवः

59

षणं स्वविशेषिसंबंधं विशेष्ये व्यावर्तयति। यथान्येष्वप्युपलक्षणरूपान्तरसंबंधे प्रकृते यार्द्धमितीद्गुणस्य स्वतोऽविधेयत्वासंभवेन भाव
नाद्वारेणैव विधेयत्वाद्विधीयमानाभावनाया वेदिमानभावनायां विशेषणत्वाच्च तथा सतीति तात्पर्यं ३

तिसृष्विति। सिद्धान्तमाह स्यादेवमिति। नन्वेवमपि कदाचिन्न्यायेनानुवादो लक्षणा हि कालानुवाद इत्येवात्र मुख्यः पूर्वपक्षः
नियमपरिसंख्ययोर्नियमस्य ज्यायस्त्वान्नियमविधौ सति प्राप्तिकालानुवाद एवैव न्याय्य इत्यादित्याशंक्याह यथा हि
केति। नन्विति। अन्यथा विशेषणवैयर्थ्यप्रसंगादिति भावः। सत्यं व्याहृत्रिफलत्वं विशेषणानां यथा पि विशेषणा
विधीयमानत्वाद्वेदिमानभावनायामधीनस्य संबंधव्यावर्त्तयेदनधीनस्य विधीयमानभावनासंबंधव्याहत्या
विहितत्वं व्यावर्त्तयेत् ततश्च व्याहत्या च विधित्वेऽहं तिसृमानस्यैव प्राकृतव्यत्वाभावे यदिच्छया प्राप्तवतः कर्त्तव्यत्वस्य
निवारकाभावान्नान्तित्रिहत्रि दुर्लभा एवं चैकस्याऽनेकस्य बहिर्वेदिसंबंधव्यावर्त्तनमात्रेण विशेषणमर्थवदित्यपरि
हरतीति सत्यमिति। उभाभ्यां देशस्थलक्षणप्रकारं तद्विधिं चाभिनयति। तद्यमिति। लौकिक एवेत्यनेन नउद्धननादि
संस्कृतवेदेरंगत्वाभावात् त्रिप्रभृतान्युक्थ्ये ज्योतिष्टोमविकृतिभूते वषट्येका दशिन्यां प्राचीनत्वयामीयमाना यात
देशत्वयायावद्यूपं वेष्टनं नादिकं नेकार्यमिति सिद्धान्तप्रयोजनं सूचितं सूत्रे यथा दीक्षादक्षिणावचनात्प्रधाना
र्थेन यथा घेहिरपि वचनात्प्रधानार्थेति अनयैव संगतिः। सामि। अथोहविर्धानाख्यवर्णनात् विचारानुपपत्तिरित्यतः अ
त्यर्थमाह दक्षिणास्मिन्निति सोमे हि हविर्धानाख्यमाख्येशकटे हविर्धानाख्यमेरुपगते दक्षिणोत्तरेति स्थितः। तत्र

शा०स्त्र० दक्षिणास्मिन्हविर्धानेऽभिषवः क्रियते तत्रैव हविर्द्धाने स्थितास्सामिधेन्योऽनुवक्तव्या इत्यर्थः। यत्र छन्दस मन्त्याः
छांदसोऽलुगिति भावः। पूर्वैव हिति संगतिः सूचिता प्राप्त इति अपरेण वेदिमिति दर्शपूर्णमासयोर्वचनाद्दाहवनीयत्र
स्यकदेशः प्राप्त इत्यर्थः। तत एव सामिधेनीनामपि न तद्देशे प्राप्तिः सूचिता। लाघवादिति अयं ताप्राप्तविध्यपेक्षया
60 पक्षप्राप्तस्य नियमविधौ लाघवादित्यर्थः। प्रयोजनं पूर्वपक्षे हविर्धानाभ्यां शकटे स्थितानां सामिधेन्यनुवचनं सि
द्धान्ते तु तत्समीपदेश इति। सूत्रे सामिधेनीस्तदन्वाहुरिति वचनात् हविर्धानयोर्मध्ये यस्मिन्नभिषवस्तद्धविर्धाने
सामिधेन्यंगं स्यात्। शास्त्र। प्रासंगिकीति। तुल्यः सर्वेषामित्यारभ्याधिकरणचतुष्टयेन स्थानस्य पूर्वे
स्सह विरोधाविरोधविचारैस्तत्प्रसंगाद्दाराद्धिष्टमित्यारभ्य यात्प्रासंगिकी कथा हूतान्तत्समाप्तौ क्रमप्राप्तं स
माख्यायाः पूर्वैस्सह विरोधाविरोधविचारैस्तैः सर्वार्थाः प्रयुक्तत्वादित्यादिना चिकीर्षुस्तदुपोद्घातमारभत इत्य
र्थः। कर्तृनानात्वे सति समाख्यया होत्रादीनां व्यवस्थाविचारो घटते नान्यथेत्यस्योपोद्घातत्वं कर्तृफलेति कर्तृ
गामिफलेन दक्षिणायाचयुक्तमित्यर्थः। यथाक्रमं सर्वोत्तरपक्षस्फोरणाय विशेषणान्युक्त्वा स्वर्गशब्दार्थमाह हवि श्री०ए०:
रिति विरहानादिरहितपदार्थः। स्वर्गेति। यजेतेत्याख्यातान्तिम कर्त्रा स्वर्गकामपदस्य सामानाधिकरण्यादित्यर्थः। आ
६०

त्मनेपदेनेति। कर्तृगामिनि क्रियाफले न विधानादिति भावः। धर्ममात्रं केवलादृष्टार्थं भावनाया इति तस्या एव
क्रियात्वेन कर्तृकारकान्वययोग्यत्वादिति भावः। क्वचित् पूर्वपक्षमाह उच्यत इति। तत्प्रयोजक इति। तस्य स्व
तंत्रकर्तुः प्रयोजकः प्रेरकः हेतुसंज्ञश्च स्यात् कर्तृसंज्ञकश्चेति प्रयोजकस्यापि कर्तृत्वस्मरणादित्यर्थः। प
क्षिरिति। साक्षात्कर्तृत्वेष्वणायोगपद्यासंभवात् प्रयोजककर्तृरीयं प्रयोग इति भावः। सूत्रेशास्त्रीयकर्मफले
प्रयोक्तरि भवति। कुतः। तल्लक्षणत्वात् तच्छब्दप्रमाणकत्वादस्यार्थस्य स्वर्गकामो यजेतेति हि स्वर्गोद्देशेन भाव
नां विदधद्वाक्यात् भवना क्रिया कर्तृसंबद्धं केवलमवगमयति आत्मनेपदेन च फलस्य कर्तृगामिता प्रतीयते
यस्मादेवं तस्मात् यजमानः स्वयमेव प्रयोगे कर्ता स्यात्। तत्र॥ संगतिसूचनार्थमाह उत्सर्गादिति। ऋतोऽ
ग्निपत्स्यक्रियादेहेति॥ सिद्धान्तमाह स्यादेवमिति संज्ञानो वरणसमये श्रवणात्तदानीं च तत्तत्क्रियागामत्वपरिच्छिन्नत्वा
त्तन्नतन्निमित्तकत्वं तासामित्यर्थः। दृष्टार्थत्वात् तत्र अनर्थकत्वात्। महर्त्विजो ब्रह्माध्वर्यूद्गातृहोतॄणामित्यर्थः। होत्र
कारणां मैत्रावरुणब्राह्मणाच्छंस्यच्छावाकनेष्टृपोत्राग्नीध्राणामित्यर्थः। अर्थलोपात्सर्वेषां यजमानत्वेन स्वतएवा
नतत्वादित्यर्थः। वैरूप्यमिति निमित्तनानात्वेन नानार्थत्वमित्यर्थः। वक्ष्यतीति। कर्मकार्यात्सर्वेषामृत्विक्त्वमित्य

शा॰ टी॰

धिकरणो वार्त्तिककृत इति शेषः वार्त्तिके योग्यतामात्रेणास्य वेन संकल्प एवोपलक्षणम इति भावः। यदीति। सत्रे वरणा
भावादध्वर्य्वादित्वं मुख्यं न संभवतीति तत्र गामिमनं तत्त्ववरणस्यादृष्टार्थतायां न सिध्येत् सत्रेऽपि तस्यावश्यकर्त्तव्य
त्वादित्यर्थः। ऋतुयाज्येति इडेहोत्रा हित्याहिभिः ऋतुयाज्यावर्यैर्वेः क्रियमाणं वश्यामन्तुयाज्यावरणं तत्सत्रे
कर्त्तव्यमदृष्टार्थत्वादिति भावः। दर्शपूर्णमासयोर्विहितवरणात्पूर्वमेव होतृत्वदर्शनात् तत्र विहितोपायं वरणं
विनाप्यध्यवसायादेव होतृत्वं स्वीकर्त्तव्यं नेह तत्सत्रेऽपीत्याह तत्स्यादिति। प्रार्थनादेवेति। ततश्चान्वयव्यतिरेकाभ्यां
तदर्थत्वं तु यावाच्यतन्त्रमापि तुल्यमिति भावः। सत्रे तत्र कर्त्तृत्वस्यज्ञावे सति यावद्भिर्यत्र प्रयोगकार्ये निर्वर्त्त्य
ते तत्र तावन्त इति कार्यतः कर्तृगणपरिमाणं स्यात् न त्वेतावन्त इति नियमः विशेषानवगमात्॥ ३५॥ प्रासंगिकी
संगतिः संस्कार्यमिति। चमसाध्वर्यून्वृणीत इति विहितो यया वरणेन संस्कार्यत्वावगतेः तेषां उद्देश्यत्वात् उद्देश्यविशे
षणस्य वा विवक्षितत्वादित्यर्थः। वरणार्थतया वऊत्वविवक्षायाश्च संभवेऽपि क्रत्वर्थतया तद्विवक्षावश्यं भवति।
न च ऋतुवाचकशब्दाभावान्न संभवः चमसाध्वर्यूणां प्राक् ऋतुसंबंधासिध्यानद्देशेन वरणमात्रविध्यसंभवाद्धि
दमेव वाक्यं प्रकरणसांनिध्येन ऋतुवाचकशब्दकल्पनया वरणसंस्कृतैः चमसाध्वर्युनामकैः कर्त्तृभिः ऋतुकर्या
त्॥ ॥ प्रासंगिकीं संगतिमभिप्रेत्याह अपातिष्ठाम इति अध्वर्युपुरुषाः प्रतिप्रस्थात्रादयः स्त एव चमसाध्वर्यव इति भिन्ना मध्यतः कारि
णां चमसाध्वर्यवो होत्रकाणां चमसाध्वर्यव इत्युत्तरलिंगैः सह व्यपदेशात्। ५

श्रीरामः

दित्येवंचमसाध्वर्यून्नकृत्वर्थेनयाविधत्त इत्युपादेयत्वात्तेषां संख्याश्रिवक्षितेतिसिद्धांतयतिसत्यमित्यादिना।अ
हेतिथहेर्तुर्होतेतिग्रहाणांक्रतुसंबंधः।सिद्ध इतिग्रहाणामेवसंमार्गविधानुद्देश्यत्वात्तदेकत्वयोरेककर्तृकारका
न्वितयोर्भिन्नयोर्नियम इत्यर्थः।होत्राध्वर्यवयोरितिहोतृकार्यस्यहोतृकर्तृकत्वमध्वर्युकार्यस्याध्वर्युकर्तृकत्वंचस
माख्याभेदादृगंतव्यामित्यर्थाद्भिन्नकर्तृकत्वमितिभावः।सूत्रेचमसाध्वर्यून्वृणीत इत्येकसन्नोबहुत्वश्रुतेर्वेहव
एवचमसाध्वर्यवः॥१३॥ एवंतत्रैवविशेषविचारात्संगतिः॥त्रित्वेमिति।कपिंजलन्यायादितिभावः।सूत्रेदशपेयये
ज्योतिष्टोमविकृतिभूतेदशपेयेएकैकंचमसमनुसर्पती।निविधिशेषे [redacted] दशचमसाध्वर्यव इतिदर्शनात्तावा
द्लिंगं।पा।मि।संज्ञाभेदात्प्राप्तान्यत्वापवादात्संगतिः।सिद्धांतयतियौगिकत्वादितिशमयतिपश्चेहिनास्तोतिया
गः।अन्येपृतिप्रस्थात्राद्यः।उपा।पूर्वातिदेशात्संगतिः।अतिदेशस्याभ्युपिकाशंकानिराकरणार्थत्वात्तामा
हतत्रेति।सूत्रेउपगाध्वर्युनान्येनाध्वर्युरुपगायेदितिलिंगात्।अन्यत्वेध्वर्योरुपगानाप्रसक्त्यानिषेधायोगात्।वि
कृ॥संगतिःस्पष्टा।अकर्तृपर्त्वात्तर्जीविकार्थत्वात्।कमी।प्रासंगिकींसंगतिंसूचयितुमाह।अस्मेति।अतोव
सेतावैयजंतियागानुकूलव्यापारंकुर्वंतीत्यर्थः।ननुऋत्विजांसतावरणाविधानात्कथमृत्विक्संस्यनिमित्तवर

श्रा·टी·

णांतत्राह ऋत्विजो वृणीत इति वरणस्याश्रावादिति ऋत्विजो वृणीत इति वाक्यविहितवरणांसंबंधस्य यत्रस्यादिति

वचमसाध्वर्युष्वपि संभवादितिभावः। ऋत्विक्शब्दस्य नानार्थत्वं योगीकारान्न दोष इत्युपरिहरति मा भूदिति स-

62 यमिति ऋत्विक्शब्दः प्रवृत्तिनिमित्तभेदेऽपि बहूनां वाचकत्वात्साधारणः न तु सर्वार्थानुगतैकसामान्यनिमि-

त्तक इत्यर्थः किन्तु तत्त्वेनेति। ऋत्विग्दधृगित्यादिसूत्र इति शेषः। तावतापि कथमृतुयजनकर्तृपरत्वमत आह कर्त-

रीति निमित्तमिति आहार्येति शेषः। उपपन्नासत्योऽकृतिरितिपूर्वेणान्वयः अस्मिन्नपि पक्षे नानार्थत्वमेवत्रसा-

दिषु नतिप्रसक्तसामान्याभावादिति ध्येयं ननु न त्वेवं नागृहीतविशेषणान्यायात्तत्र सत्त्वादिकमेव ऋत्विक्शब्दार्थः स्यादि-

त्याशंक्य नहि तत्र सत्त्वादिकं प्रवृत्तिनिमित्तं निविष्टं येनोक्तदोषः स्यात् किंतूपाधिमात्रं यथाहरतेर्हृतिनाथयोः प्रशावि-

ति स्मरणात् हृतिहरिपदे पशुत्वं तद्वदित्याह हृतीति क्षतिः समग्रहशवस्कृतिः वरणविधिस्थेति। वरणवाक्यस्थमित्यर्थः। भाष्य-

कारपक्षे वरणांतरस्यवाश्रुतेः स्विकवरणानामेव वा ऋत्विजो वृणीत इत्यनेन ऋत्विक्त्वरूपफलमिध्यर्थे तथाविधि-

संभवेऽप्याचार्यपक्षे वरणस्य ऋत्विक्त्वार्थत्वाभावेन केवलानर्थत्वं तथाच्यानन्ते श्वाध्वर्युं वृणीत इत्यादिभिरेव सिध्या- श्रीएपः

ऋत्विजो वृणीत इत्यस्यानुवादकत्वस्यैवस्याय्यत्वेन विधित्वानुपपत्तिरिति ध्येयं न न्वेवमध्वर्य्वादिशब्दानामपि

६२

र्त्विजेऽदाततिअम्लेणार्त्विजोऽदानिपर्यवसानात्सामानाधिकरण्यलक्षणो यत्रर्त्विक्शब्दरूपः श्रुतिसंयोगस्तस्माद्दक्षिणाप्रभृतिनामि
वर्त्विक्कर्तृनियमः स्यात्॥ ॥स्वामि॥ ॥सप्तदशत्वस्यानिर्धारितत्कोविदेव ३

यौगिकत्वं स्यादित्याशंक्यैवं पक्ष्यमाह। अध्वर्य्वादीति प्रकारान्तरेण संकल्पेनेत्यर्थः। प्रयोजनं पूर्वपक्षे ऋत्विज उप
वसंतीत्यादिकर्त्विक्कर्मैः सर्वेषां सिद्धान्ते ब्रह्मादीनामेवेति मन्त्रे कर्मकार्यान्तयन्तकरत्वादिति यावत्॥ ॥नियम॥ ॥
सूत्रे ऋत्विग्भ्यो दक्षिणां ददातीत्यग्नीधे ददाति ब्रह्मणे ददातीत्येवं दक्षिणाभिस्सहाम्नानेऽग्नीधे ऋत्विजो न स वे
इत्यस्यार्थस्यास्थिरत्वात्तत्स्थिरीकरणार्थं सप्तदशत्वस्य निर्धारणात्संगतिः। वरणाम्नानादिति सदस्यं वृणीत
इति वचनादित्यर्थः। ननु सदस्यकार्यार्थं ब्रह्मणः पुनर्वरणं नत्राहाध्वर्यो दीक्षितीयेनेति। यद्यप्यस्य कृताकृतावेक्ष
म णं कार्यं तथापि न तस्मात्र ऋत्विक् युज्यते किन्तु ऋत्विक्स्वरूपयुक्त्योगकरणं अवेक्षणं च नांगं विधानाभावादिति भावः।
अत्र च सामविकल्पे यज्ञादेसायांगेतिशेषि मन्त्रेणांगत्वेऽपि नोक्तानुपपन्नमिति सदस्य चमसदासः। नेसो। शास्त्रफलंप्र
योक्तरीत्यादिना प्रवृत्तस्योपोद्धातस्य नन्वसंक्तोऽनुषसक्तस्य चमसमाख्याप्राप्तावसंपर्ये विचार इत्याह नानेति नन्तु स
माख्यया व्यवस्थाने त्राह दुर्बलेति। आम्नेति सांग्रहणे श्येमामनमस्यामनंस्यदेवोऽइति तिस्र आहुतीर्जुहोति। तिविहि म
ता होमा आम्नहोमाः अन्तेरेति। तस्वीर्या इत्यस्य अग्नय इत्यस्य सूत्रस्य चाने नैर्तयेणाकरणमित्यर्थः। स्वकालत्वस्य
यथाश्रुतस्य सर्वार्थतासाधकत्वाभावाद्याचस्येस्वतंत्रेति पर्णान्ते वैषम्यमाहनैचाति। पर्णानो विधेर्वैकृतं जुहूसाधारण्यं

विकृतौ नु कृताभिमर्शस्य प्रवृत्तिचोदकेन तत्र नु कृतः आघारः स च पठितो विशिष्ट इत्येव आघारग्रहणे पुनः पठितो विशेषाने
हि रुक्तिदोषः स्यादिति पठितायाः प्रकृत्यर्थत्वं आमनहोमादयस्तु विकृतावुपदिष्टा एवेति तेषामतिदेशेन विकृति
षु प्राप्त्यभावान्नाधिरुक्तिदोषः तस्मात्प्रकृतस्य पदिष्टहोमवृद्धिकृत्सु उपदिष्टहोमानामप्याहवनीयविधिस्तत्त्वइ
घृत त्यर्थः॥ नन्वेवं विकृतिदेशेन प्राप्नुवन्ति ये चतुरवत्तहोमा नाभिहोष्यमाणस्य तत्साधारण्यमाहवनीयस्य न स्यात् न च
63 स्वायत्तिः। सर्वार्थ इति सूत्रविशेषात् तत्राह यत्रेति एवं च सूत्रे सर्वपदं संकोच्यमिति भावः उत्सर्गः नियमः तस्योत्
तत्संयोगादित्याह पूर्वसूत्रे प्रकृतस्याध्वर्य्वादिपुरुषसंयोगस्याध्वर्य्वादिसमाख्यानस्येति यावत्। तस्यापदेशो
न विशेषसमाख्यानेन चोदिते देशः निष्कर्षः अपवाद इति पाठ इति सूत्रार्थः। आभाकरे रिदं सूत्रं सामान्यसमाख्यस
माख्यायावचनं विशेषसमाख्याभ्यां बाधस्तु स्यात् नोर्धमधिकरणान्तरत्वेनाव्याख्यातं तदनुपपन्नं समाख्यायाव
~~चनं विशेषसमाख्याभ्यां बाधस्तु स्यात् नार्थमधिकरणान्तरत्वेनाव्याख्यातं~~ तदनुपपन्नं समाख्यायावचनापेक्ष
या सामान्यस्य विशेषापेक्षया च दुर्बलत्वस्यान्यत्र सिद्धत्वेन पूर्वपक्षानुन्मेषात् प्रकृताधिकरणशेषमेतमेवेद श्री रामः
मित्याह तदिदमिति यत्र होतुः प्रातरनुवाकमनुब्रूहि उपश्रुणु इति प्रातरनुवाके होतुर्दर्शनात् उद्गीथमुद्गातृ

रो णामवः प्रणवउक्थशंसिनो प्रतिगंध्वर्युणामित्युक्तो यादिपू द्रा‍ऽऽरंदिदर्शनाच्च समाख्याव्यवस्थापिके सेवमर्थे
कं तद्दृष्टलिंगदर्शनमित्युत्तरसूत्रं तत्सिद्धेनुपपन्नं स्यादित्याशयेनाह। अतएवेति। प्रथमसूत्रे प्रकृतत्वात्सर्वे
षामृत्विजां सर्वप्रधानार्थकरणशक्त्यापत्तावर्थेः सर्वेषां प्रकृतत्वादित्यर्थः। प्रैषा॥ लिंङ्गइति। समाख्या प्रकृते व्य
वस्थापवाद प्रदर्शनार्थमुक्तेइत्यर्थः किमितिउक्थशायन सोमस्येत्यादयो व्यस्ताः प्रैषाः प्रातरनुवाकानुवच
नाहोनिव्यस्तानेनुवचनानिहोतापदग्निमित्यादीनि प्रैषानुवचनो भयात्मकानि तत्र किं व्यस्तसमस्तात्मके
पु प्रैषेषु अनुवचनेषु चमैत्रावरुणोपदेशउत प्रैषानुवचनोभयात्मकेष्वेवेत्यर्थः। प्रैषानानीति। येषामनुवचनाना
मन्तेयजेति प्रैषो वर्त्तते तानीत्यर्थः साहित्यमिति चशब्दप्रतीतमपि साहित्यमुद्देश्यगतत्वादविवक्षितं। उद्देश्यभेदेन
वाक्यभेदेऽप्यगत्या स्वीकार्यः चशब्दोप्येकस्येव मैत्रावरुणस्योभयत्रान्वयामात्रानुवादइतिभावः अपेक्षितविधित्व
लाद्‌उभयात्मकेषु मैत्रावरुणविधिरिति सिद्धान्तमाहनैवमिति निर्ज्ञातइति। प्रैषानानुवचनानि च मैत्रावरुणस्य
समाख्याबलादितिशेषः प्रत्येकं मैत्रावरुणाविधौवाक्यभेदापत्तावशब्दसहितास्यातद्वयेनानुवचनविशेषस्यैव
लक्षणीयतयाउभयात्मकेषु वर्त्तते विधिः। वाक्यभेदा लक्षणायाज्यायस्त्वादितिभावः तदधिकारइति। प्रैषानानुवचना

वनसंनिधानइत्यर्थः सत्रे सर्वप्रैषाः सर्वाण्यनुव १

शा·दी· निचमैत्रावरुणस्य कर्तृत्वानिरूपदेशात् ॥ चमसाध्वर्यवत्सामान्यसमाख्याबाध इति संगतिः ॥ अपेक्षितत्वादिति। अ
ध्वर्युप्राप्तिश्च आध्वर्यवमिति सामान्यसमाख्ययेति सामान्यसापेक्षत्वाद्विशेषस्येति भावः। अध्वर्युवद्भावादिति चम
सहोतृत्वेनैवाध्वर्यूणां तत्सादृश्यनिरूपकत्वमिति भावः। नन्वेवं चमसाध्वर्यूणां होतृत्वमेव नास्तीति तेषामध्वर्युव
द्भावोपि न स्यादित्यत आह तस्येति सुब्रह्मण्यप्रचारादिष्विति भावः। वेदो। चमसहोमस्य समाख्यया आध्वर्यवकर्तृत्ववदि
हापि समाख्यया कर्तृपरिग्रह इति संगतिः। तत्रेति। प्रधानप्रयोगविधिना सांगस्यैव तस्य विधानादिति भावः। चोदक
तो नानाकर्तृत्वमाशंक्याह। तस्या इति। चोदकस्योपजीव्यत्वादिह न दौर्बल्यमित्याशयेनाह। भवेदिति। अंगेषु समा
ख्यया अलब्धप्रमाणाभावत्वादपि न तत्र कर्त्रंतरबाधकत्वमित्याह। तेचेति। नचेति। शरमयं बर्हिरित्यादौ यथा चो
दकप्राप्तस्यापि कुशादेर्बाध एवमिह चोदकप्राप्तस्य नानाकर्तृकत्वस्य बाधो न संभवति समाख्यारूपोपदेशस्य क
ल्प्यप्रमाणाभावत्वेनाक्लृप्तत्वादित्यर्थः। पाठेति। मंत्ररूपांगेषाम्नानलक्षणपाठनिमित्ता तद्भिन्नांगेषु प्रातिस्विकवि
धिलक्षणपाठनिमित्तेत्यर्थः। न विधिनिमित्ता। न प्रधानविधिनिमित्तेत्यर्थः। प्रधानविधेरविषयत्वस्य कल्प्यत्वेन त श्री एमः
त्रपाठाभावेन आध्वर्यवकांडपठितत्वनिबंधनाध्वर्यवसमाख्यायाः प्रधानविधिनिबंधनत्वानुपपत्तेरिति भावः। सूत्रे

६४

वेदस्योपदेशाद्दोहात्रादिसमाख्यानात्प्रधानवेदस्यान्यत्वे सतिययासमाख्यं पदार्थानां कर्त्तारः स्युः। ॥इतिश्रीचं
पकनाथहतौशास्त्रदीपिकाव्याख्याने प्रकाशाख्याने त्रितीयस्याध्यायस्य सप्तमः पादः ॥ ॥ स्वामि॥ ॥अस्मिन्पादे पूर्वोक्त
समाख्यानिबंधनाध्वर्य्वादिकर्तृकत्वापवादेन स्वामिकर्तृकत्वं प्राधान्येन प्रतिपाद्यत इति पादेन संगमानंत
र्येचेत्याहुः॥ अत्र ध्वर्य्वादिनेति अध्वर्य्वोः स्तु परिक्रयः समाख्यानुगुणप्रतिप्रस्थात्रादिभिः कर्त्तव्य इति भावः समा
ख्यायाः कर्त्रंतरस्यापकत्वाभावान्नतयाध्वर्योः परिक्रेयप्राप्तिरित्याशयेनाह स्वामीति आश्रितमिति शास्त्रप्र
त्तं प्रयोक्तरीत्यत्रेति शेषः ननु आध्वर्य्यवादिसमाख्ययैवान्यकर्तृकत्वं सर्वत्र न परिक्रयान्तत्राह नहीति समाख्या
मात्राद्धन्यकर्तृकत्वाश्रयणोपरिक्रयाभावस्थलेपि समाख्ययान्यकर्तृकत्वं स्यादित्याशयेनाह नहि येइति एवं च
परिक्रयाधीनमन्यकर्तृकत्वं न परिक्रेय भवति तस्य परिक्रेये भवति नतु परिक्रयप्राप्त्या ध्वर्य्वादेरभावात् किंतु न
हितरांगे एवेत्याह तानइति समाख्यया कर्त्रंतरप्रवेशमंगीकृत्याप्याह किंचेति लाघवादिति यजमानेन स्वामिना
पिकस्याचित्सहायार्थस्य कर्त्तव्यत्वे सति परिक्रयनियममात्रविधौ लघुत्वादित्यर्थः॥ असंनायाप्ते इति यजमानइत्यध्वर्य्व
ध्वर्योः स्वामित्वाभावेन स्वकीयदक्षिणाध्वर्योः परिक्रेतृत्वस्य विधिन एव प्रापणीयत्वादिति भावः एवंचन्यायसा

श्रा.सू.

65

म्यात्प्रतीतिरूपक्रयणवत्तद्देवतोद्देशेन द्रव्यत्यागे आत्रेयेहिरण्यदानादौ च यजमानस्यैव कर्तृत्वं सत्रे च परिक्रयणाद्
उपलक्षणमित्याशयेनाह तस्माद्धीति हाने स्वत्वत्यागः। ननु दानमात्रस्य याजमानत्वे स्वायमात्रस्येष्टकोपधा
नुरविहृद्ध्यासुरास्य च ब्रह्मणे कर्तृत्वं न स्यात्तत्राह। यत्रेति। वरानिति गोवैवरो निवरोऽन्यो धेनुर्वरोतिवरोऽन्यो नडानड्वा
गातिवरोऽन्य इत्यापस्तम्बोक्तोऽर्थः शब्दार्थो द्रव्यः स्वयमात्त्वेनोपधातुरविहृद्ध्याहरणस्य क्रत्विक्त्वाभावाद् नहान
होत्रादेय इत्यादिकमन्वाहरणादौ ध्येसत्रे परिक्रयस्वामिकर्मांगस्यकर्मणः स्वाम्यर्थत्वात्। संस्का। समाख्याना
दिति। परिक्रयवत्त्वात्प्राप्तानां ऋत्विजामिह समाख्यया नियमसंभवाद्धीति भावः। एवं च पूर्वं वैयम्यात्संगतिः का
र्ययोग्यतां फलाधारत्वयोग्यमिति यावत् ननु योग्यतापि परिक्रीतेष्वस्ति किं न स्यात्तत्राह न वेति। योग्यतेति परकीय
योग्यताजननार्थमित्यर्थः। स्वयमेवेति स्वामिन एवेत्यर्थः। ननु ऋत्विक्कृतानामेव संस्काराणां स्वामिनि योग्य
ताधायकत्वं समाख्याबलाद्धस्तु तत्राह सतस्येति संस्वामी तस्यास्वस्येत्यर्थः ननु हिरण्यमालित्वादिवत् ऋत्वि
जां वयनादपः। किं न स्यात्तत्राह। वचनादिति सूत्रे संस्कारस्तोत्रादिकमेव तत्तद्देहसमाख्यया व्यवतिष्ठते व तेषां श्रीराम:
कर्तृस्वरूपसामर्थ्यजननेऽरुपयोगासंभवात्। नपा प्रवृत्तपक्षेयाविशेषशंकयात्त्वानात्संगतिः। इन्द्रेवेति तथा च द्वःदेवा ६५

न्तकृतपसेपश्चिक्रियशेषोपपन्नेषुक्तासमारब्धयाव्यवस्थेतिभावः। दुःखफलमितिबहुव्रीहिः। क्रतुदुःखोन्तकृत
पसेपश्चिक्रियशेषोपपन्नेषुक्तासमारब्धयाव्यवस्थेतिभावः। दुःखफलमितिबहुव्रीहिः। कार्यविरोधिनेक्रतुफलप्र
तिबंधके। योऽपनेति। पापस्य दुःखरूपफलनाशकत्वादितिभावः। अत्रेनलिंगमुपपादितं। प्रकरणमुपपादयन्ना
ह कृत्विति। कृतार्थत्वेप्ययंगातखद्दाध्वर्यवेकिंनस्यात्तत्राह यजमान इति स्त्रेतपश्चाद्याजमानेफलोसत्तिप्रतिबं
धकदुरितनिवर्त्तनेन फलसिध्यर्थेलाघयालोके स्वल्पेनापि प्रायश्चित्तेन महतो दुरितस्य निवृत्तिरिहापितथा स्व
ल्पेनापि महतोदुरितस्य निवृत्तिसंभवात्॥ ७॥ हिरण्यमालिनमाध्वर्यवसमारब्धयाऽध्वर्योः लोहितोष्णीषत्व
मेऽत्र समारब्धयोर्होतुरेवंतत्त्वसमारब्धयातेन संस्कारः कार्य इत्याह। समारब्धयेति एवं वाक्यतोहि समारब्धया
व्यवस्थेत्यस्थानात्संगतिः। समारब्धयोर्हिरण्यमालिनऋत्विज इत्यविशेषवचनं संकोचायोगांशयेनाह। यत्रेति।
सत्रे संस्काराणांक्रत्विगपेक्षयाऽऽरात्वान्नहेहसमारब्धयाव्यवस्थाप्यानं॥ तथा॥ सहोनामक मंउपउदगायन्तस्तत्र वाहि
तान आरभ्योदगपवर्गासु मध्यमासु स्थूणासु ओदुंबरीयजमानसंमिताइतरा अपि औदुंबरी संमिताः नासां पश्चात्
सु पुरस्तात्तयास्थूणास्ताः पर्यन्तस्थूणास्तासामिदिष्य इति नित्यप्रमाणाग्नेष्टिकामस्यसोदुंबरीमपी चैः कृत्वास

इत्यनात्सर्वेषामेवायंसंस्कार इत्या ८

शा॰ टी॰ दोमानत्वमित्यर्थः। नत्कामानाधिकरणत्वादिति। कामयेतेति विशेषः अधिकृतत्वादुपस्थितत्वादित्यर्थः। एवं चा
त्र समाख्याथाः कामयेतेत्यत्र कर्त्तीकामाशामकतयावचनानुगुणत्वान्न बाध इति संगतिः। परार्थे इति। इतरथा
66 डुमिञ् प्रक्षेपण इति धातोर्मितत्वात्कर्तृगामिनि क्रियाफले आत्मनेपदप्रसंगादिति भावः। यदि कामयेत वर्षुकः
पर्जन्यः स्यादिति नीचाः सदन्नग्निमृज्यादित्यादावाध्वर्यवत्वस्यादित्युक्त्वाह किंनिन हीतिपरकीयकाम्यगुणे वे
न यजमानप्रयोगे प्रसंगादुपकाराभावाद्यजमानस्य नियमगुणोवश्यं प्रयोज्य इति भावः। अधिकारचिंतायोपे
काम्यगुणाशेषत्वपर्यवसितेत्यध्यायसंगतिर्वोध्यास्त्रेः। कामोपि नपोवद्याजमानएव अर्थेन क्रतुफलेन यजमा
नस्य नित्यसंयोगात्तदर्थो नित्यगुणस्य प्रयोज्यत्वेन तत्र परकीयकाम्यगुणानवकाशात्॥ मंत्रा॥ सूक्तवाक
प्रकाश्यानामाशुरादीनामिवान्त्राशुरादीनां न फलत्वं तद्देतेषां करणमंत्रत्वाभावादत एव फलार्थगुणकाम
वैषम्यमिति प्रत्यवस्थानात्संगतिः कर्मेति आशुरादीनां फलत्वाभावेपि आयुरादिशब्दैर्लक्षणयाकर्मफलमे
व प्रकाशनीयं उत्साहजननेन दृष्टार्थत्वलाभादिति भावः। नर्हिगिति। ऋत्विक्फलप्रकाशनस्य यजमानसंबंधि श्री राम:
निकतानुपकारकत्वाभावादिति भावः। तस्यापि ऋत्विगन्माहह्याराकथंचिदुपकाराकथंचिदुपकारकत्वं संभाव्या ४६

ह्यजमानाश्चेति। मंत्रेणैतदुक्तं भवति याजमानाः। यथाम्नातसमाख्याबाधापवादात्संगतिः। आध्वर्यवे आध्व
र्यवसमाख्यातेकांडे एकेनैवेति। एकत्रोत्सन्निरन्यत्र विनियोग इत्यसंभवत्र पाठउपपन्न इति भावः। उक्तत्रिविनियो
गयोरेकेनैव पाठे न सिद्धः पाठान्तरवैयर्थ्यं स्यादित्याशयेनाह सत्यमिति। ननु मंत्रस्वरूपस्यैव प्रयोगवचनेन ग्रहणं
न तु पाठस्यानंगत्वात्तत्राह। न चेति अत एवेति पाठविशिष्टस्यैव प्रयोगवचनेन ग्रहणाद्धित्यर्थः। भिन्नविषयत्वेनेति
आध्वर्यवे रुच्चारणमनुष्ठानसिद्ध्यर्थं यजमानस्य त्वश्रमाहार्थं प्रयत्नेच्चारणायेति भिन्नविषयत्वमित्यर्थः॥ वा च॥ इष्ट ज्ञाते=
त्रीरिति। आयुर्यज्ञेन कल्पतामिति त्वरूपस्य यथार्थकत्वयुक्तानमंत्रानित्यर्थः। सिद्धांतयति नैवमिति। याज॥ पूर्वत्रज्ञानि
यमवदिह यजमाननियम इत्युक्तानात्संगतिः। द्वादशो नियम पिवत्सं चोपविष्ट जपत्त्वं वाधिश्रयति द्वी हीन व
चहेति द्वषदोच समाहंति अधिवपवतकपालानि चोपदधाति पुरोडाशं वाधिश्रयति आज्यं च संवयजुसृहरत्य
भिचरहाति वोहंचपरिगृह्णाति पत्नीं च सन्नह्यति प्रोक्षणीश्चासादयति आज्यं चेति चतुर्दशानां पदार्थानां
कीर्तनात्समेवेहदूहानि तथापि भवांतु वाके समभ्यकपाला निचेत्यादिना दशानां पदार्थानां कीर्तनात्तैः स
ह द्वादशहेद्धानि वोध्यानि नचेति समारणेन शाखस्त्वादिति भावः। कारणिष्यतीति। समारणेनेति शेषः। एवं चव

शा॰ दी॰

67

चनवद्धाजमानेसमाम्नानमप्यपिप्रयोजकत्वेनोपपन्नमितिभावः॥ विश्वा॥ चोदकेतिज्योतिष्टोमात्मद्वादशाहेन
तोगवामयनेततः कुंडपायिनामयनेऽस्त्येवं चोदकपरंपरयाग्नीषोमीयस्ययशोः कुंडपायिनामयनेप्राप्त्यात
देगमंत्रावपिप्राप्ताविस्युर्थेः। अलिङ्गसमासः एकस्यालिंगोऽनेकलिंगकार्यसंबंधः। अभ्यासादितिपरिव्याणसं
कल्पप्रभृतिधारणानादानप्रभृतिवापरिव्याणस्य क्रियमाणतावस्थापन्नत्वान्नत्वप्रत्ययपरिसमाप्तेः क्रिय
माणानुवादिनः कालः करणमंत्रस्यतुरशनादानानंतरंउपसमीपुंगत्वात्प्रयोगइतिक्रियमाणानुवादिम
ध्यकालत्वेनयाचयूपायपरिवीयमाणायानुब्रूहीतिप्रैषंदत्वाकरणमंत्रः प्रयोज्यस्तदानींचक्रियमाणानु
वाद्युपस्थितइत्युभयोरेककालत्वात्क्रमेणचप्रयोगेयोगपद्यासंभवादभ्यासिरितिभावः। परिधेरितिपरिधे
स्तत्रोपकार्येनियोजनेविधानात्मत्वकत्वादिपरिधिधर्माविरोधिनएवउपपेदूसाभंवातिनतुनहिरोधिनस्तदृणा।
इत्यइतिद्वादशाहवत्प्रमाणत्वाक्षितिभावः नयूपधर्मोधितिति। नेतुकार्यापत्त्यात्रातिदेशानएवप्राप्तास्तनत्रातामयोरप्या
तिदेशीकतेसतितत्रप्रथमोपस्थितः परिधिधर्माएवप्राप्ताइतिचेषम्यभिस्यर्थः वदृष्यतीति। अष्टमद्वितीयपादांत्या ॥ श्रीरामः
धिकरणसिद्धांतसूत्रकारइतिशेषः। एतेपंचदशरात्रकुंडपायिनामयनेसत्रेएववत्सहीनेयेकामसिद्धांतेत ६७

वाभयोरुपायिचोदनावादित्वादिति तत्रत्रार्थः उभयोरेव कर्तृकत्वविधावसमतात्पर्यं गाकारे आग्निदीध्रिकहोतृकार्या
द्दोपदेशिकाध्वर्युकार्यस्य प्राबल्यपरनिबंधनग्रंथविरोधोपी स्याह प्रसक्तेति × २

एतं पंचदशरात्रमुपेयुः शिनिभूतिकामा उपेयुरिति। सत्रे विरोधे होतारकरणमंत्रं ब्रूयात्तस्य च वचनकृता
तत्समवाये आनुमानिकोपेक्षयाविशेषसद्भावात् नचैतावता क्रियमाणानुवादिनस्त्यागः किंतु नमस्तो ब्रू
यात् सोपि नसर्वेषां मध्येयस्य मैत्रावरुणादेः प्राधान्यविशेषोत्प्रत्यासत्तिरूपोस्ति सब्रूयात्॥ ॥प्रेषो हो
॥ ॥पूर्वत्र वचनबलादातिदेशिकस्याप्राकृतसमाख्यालब्धस्य कर्तुर्बाधेपीह वचनाभावान्न समाख्याल
ब्धकर्तृबाध इति संगतिः। प्रेषार्थकत्वोपद्रवलात् समाख्याबाधमाशंक्याह। प्राप्तेति। प्रेषातिसर्गप्राप्तकालेषु
कृत्याश्चेति प्रैषप्राप्तकालयोर्लोडर्थत्वस्मरणादिह समाख्यानुसारात् प्राप्तकालार्थत्वं मध्यमपुरुषस्साध
त्वार्थमित्यर्थः। सत्रे प्रैषेषु प्रेषार्थमन्यः कुर्यात्प्रैषस्य भावतः परविषयत्वात्॥ ॥अध्व॥ ॥स्फुतमित्य
नेन संगतिः सूचिता। किमिति पक्षद्वये मध्यमपुरुषो निर्दिष्टः तद्विषयोयं विचारः निर्दिष्टेषु तु समाख्यया लिंगबाधो
संभवेन्नैव कर्तव्यत्वादिति ध्येयं। सूत्रेत्र अध्वर्युः प्रेषार्थकर्ता स्यात् पूर्वत्वं चेधारयेत वज्रोध्वर्युर्हि एवो नेत्य
ध्वर्योर्हि स्यात्तावगमनतरन्यस्य स्यात्पूर्वापरपित्रनुदृष्टानात्स्पष्टत्वेन स्येवप्रेषकर्तृत्वात्॥ ॥करति॥ ॥नन्व
तेषामपेक्षत्यागाश्रीस्वादाप्रहोत्रग्नइत्यादिमंत्रेव याजमानत्वाद्विचारएवायमनुपपन्न इत्यत आह। अ

शा.टी.

68

करणेति। नह्यतिात्र याचते षां कारणत्वमेव न स्यादिति भावः। नन्वेवं मंत्रसाध्यक्रियापि यजमानेनैव क्रिय
तां न यथा सति करणत्वं न व्याहन्यत इत्यत आह नचेति व्यतिरेकेति व्यतिरेकशब्देन भेद उच्यते विना तत्प्रयुक्त संबंध
प्रयुक्तेत्यर्थः। प्रयोजनमनुष्ठानसमये मंत्रात्तत्फलमूर्त्तिमात्तया तात्तव्यं प्रत्येयेत्तेसिद्धा तेन यजमानगतत्वेपास्म
त्रेकरणमंत्रे शुक्रत्विक्फलं प्रकाश्यं मंत्राणां मुख्यार्थप्रकाशकत्वात्॥ ॥कर्म॥ ॥ पूर्वन्यायाद्यजमान
गामित्वमिति प्राप्ते सिद्धांतमाह। मा भैति। अग्नाविष्णुवयोर्मध्यगमनेन मा मा संताप्तमित्यर्थः। कर्मेति। सं
नमेना ध्वर्युणा कर्मणः कर्त्तुर्भिन्नत्वादिति भावः। व्याप्ता। पूर्ववत्कर्मोपयोगित्वाभावादात्मनेपदानुगुण्या
द्वैकवलायाजमानमिति प्राप्ते सिद्धांतयति यत्रेति। तत्सर्वं मंत्रप्रकृतमद्धमित्यर्थः। ऋत्विग्गामित्वमिति ऋत्विग्
गामित्वमपीत्यर्थः॥ ॥द्रव्य॥ ॥उत्तरेति। केवलप्रधानार्थत्वे प्रयावदुत्तरणाबर्हिषि कर्त्तव्यत्वमित्याणयोगा
दिति भावः। आचार्योक्तसत्प्रयोजनामाहाथवेति। अतिदेशविषयेऽपि चेतानेसंगात्संगतेत्याद्वः। धर्मातोप्र
कृतौ कार्यविशेषसाधनार्थत्वेन निर्दिष्टादपूर्वस्याप्राकृते कार्यस्य प्रयावदुत्तरणाबर्हिरादेस्तधिकारो धर्मसंबं
धाभाव इति द्वितीयसूत्रार्थः॥ ॥विरो॥ प्रसंगे सत्र्वयति इदानीमिति विघ्नन्नीति समावप्रच्छिन्नागेनोदर्भो प्रादेशमा

श्रीरामः

५८

सत्रे त्रिधातुविशेषादिति संस्कृतस्मा ४

पादधृता पर्व २

त्रौपवित्रे करोतीत्यत्र रत्निमात्रे विधृतौ इति स्कृतं वर्हिरित्यर्थः॥ अविशेषादिति॥ बर्हिर्लुनातीत्यादिविधिषु स्तरणा
र्थत्वे विशेषाश्रवणादिति भावः। धर्मविधिषु बर्हिः सामान्यस्य श्रवणेऽपि त्रिधातु पंचधातु वा बर्हिर्लुनातीति शब्दानेन
स्य सर्वस्य त्रिधातु पंचधातु वा बर्हिः स्तृणातीति विनियोगात् स्तरणार्थस्यैव धर्मा बाधिः प्रयोक्ष्यतीत्याह॥ धर्मवत
इति। गणान्यत्राविनियोगविशेषे सति बाधविधृत्यादिकार्येऽन्यो धर्मरहितः परिभोजनीयाख्यः स्तम्भमुष्टिविशेषः
स्यात्॥ अप॥ ॥ पयस्येति पयस्यां मैत्रावरुणपात्रे धाना आमिक्षिन पात्रे इ सत्रेत्यर्थः। सिद्धत्वादिति चतुर्थे इति
शेषः। शिष्ट आथर्वणी अथर्ववेद विहिताभिचारादिवद्दोष्यमित्यर्थः। मंत्रेति। उपांशुत्वान्वयस्य मंत्रद्वारकत्वान्मंत्र
स्य चांगप्रधानयोः समत्वात् उपांशुत्वमेव प्रधानार्थं यथा योगानामपि हविरासादनसत्वाद्धर्हिस्तु इमो गामगे साधारणं यत
येत्यर्थः। एवं च यथा सर्वत्र द्वितीयाश्रुतिबलात्तण्डकस्य संस्कारत्वमेवमुपांशुत्वस्य मंत्रद्वारकत्वसामर्थ्यबलादंगप्र
धानार्थत्वमिति संगतिः। तेषामेवेति। न चैवमुद्देश्यानामिष्टीनां काम्यत्वविशेषणेन वाक्यभेद इति वाच्यं नाइत्येके न श
ब्देन काम्यत्वविशिष्टोद्देशादुद्देशाद्देश्यभेदादिति भावः। भावनान्वयद्वारा पदार्थान्वयित्वादुर्मीणां प्रवर्ग्यादिकर
णाक भावनायाश्च सांगप्रधानव्याप्ते स्तहश्चित्स्या स्वे त्वादेरपि कृत्स्नमंगप्रधानार्थत्वं प्रकृते तु न व्याप्त्यायस्य कर्मी

श्रा॰दी॰ र्थकत्वाद्दिष्टिकर्मकभावनाप्रतीतेस्तस्याश्चांगप्रधानत्वाद्यभावादंगसाधारणमिति वैषम्यमुपपादयति
तत्राहेति। सन्निधिः सर्वत्रवाक्यादिवेहश्रुतकरणात्प्रधानार्थत्वमिति संगतिः इतिश्रर्मभक्तिलिका।। तत्का।। सत्रे सुत्या
कालांग एवेह स्यात् पशुसाहित्येऽप्रधानांगत्वेन विहितस्य सुत्याकालस्य रूपलिंगदर्शनात्। भाष्ये। शाक्यानामिति। शा
२ क्यनामकस्य ऋषेर्यस्य संबंधिपर्वतस्तत्र स्थितत्वादित्यर्थः। नवनीतवदिति संगतिः सूचितत्वा। जघन्यस्तु वत्स छतो
दर्शनमपि पुरोडाशपदस्य सान्नाय्यग्रहणाद्विनिगमकमित्याह। प्रकृतावपि पुरोडाशानग्नेर्कुर्वीतैत्रैव पुरोडाशशब्दस्य
पुरोडाशपुरोडाशसमुदायेलक्षणा इत्यर्थः। अलंकृत अभिधारयेत्यर्थः। आनंतर्यादपि तस्यैवोद्देशकत्वमित्या
हाव्याख्यायाहेति। विप्रमीतनयोर्वैलक्षण्ये न नवनीतउद्देश्यसमर्पकस्याज्यपदस्य सर्वसाधारण्यैरहेतु सवनीयपदस्य
न तन्मेति वैलक्षण्यमिति भावः। अध्यायार्थसंग्रहं करोति शेषमिति तद्विनियोगस्य तत्सु शेषस्य यो विनियोगः शेषश
विभागस्तत्सर्वोऽस्मिन्नध्याये विचारित इत्यर्थः सत्रे श्रौतनरसशब्दस्य व्याख्यानं मासमिति तिनह्यनादीनां सवनीयानामेवं नतु स्वा-
सवनीयासवनीयपुरोडाशानां सन्निहितान्वयरूपविशेषत्वाभावात्।। ।।इति श्रीचंपकनाथकृतौ शास्त्रदीपिका श्रीरम:
व्याख्याने प्रकाशाख्याने तृतीयाध्यायस्याष्टमः पादः समाप्तश्चाध्यायः शुभमस्तु श्रीरामाय नमः।